CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 582

Title Truptidipavyakhya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 582 Subject : Vedānta.

Title : Truptidipa vyākhyā

Author : Vidyāraṇyamuni Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : Place of the Ms. : —

Size : 11.8" by 4.9" Extent : 69 foll

Language : Sanskrit. Script : Devanāgarī

Remarks : —

॥श्रीः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ नत्वा श्रीभारतीती
र्थविद्यारण्यमुनीश्वरौ॥ क्रियते तृप्तिदीपस्य व्याख्यानं गुर्वनुग्रहात्॥ तृप्तिदीपाख्यं प्रकरणमारभमाणः
श्रीभारतीतीर्थगुरुस्तस्य श्रुतिव्याख्यानरूपत्वाद्व्याख्येयां श्रुतिमादौ पठति॥ आत्मानं चेदिति॥१॥ इहानं

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्॥१॥
अस्याः श्रुतेरभिप्रायः सम्यगत्र विचार्यते॥ जीवन्मुक्तस्य या तृप्तिः सा तेन विशदायते॥२॥

चिकीर्षितं विचारं तत्फलं च दर्शयति॥ अस्या इति॥ अत्र तृप्तिदीपाख्ये ग्रंथे अस्याः आत्मानं चेद्विजानीयादित्या
दिकायाः श्रुतेरभिप्रायस्तात्पर्यं सम्यग्विचार्यते॥ तेनाभिप्रायविचारेण जीवन्मुक्तस्य श्रुतिसिद्धा या तृप्तिः
सा विशदायते स्पष्टीभवति॥२॥ पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना॥ आक्षेपस्य समाधानं व्याख्या

नं पंचलक्षणमिति व्याख्यानलक्षणस्योक्तत्वात्पुरुषपदस्यार्थमभिधातुं तदुपोद्घातत्वेन सृष्टिं संक्षिप्य द
र्शयति॥ मायाभासेनेति॥ प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थांतरवर्णनमुपोद्घातः॥ अत्र मायाशब्दे
न चिदानंदमयब्रह्मप्रतिबिंबसमन्विता सत्त्वरजस्तमोगुणात्मिका जगदुपादानभूता प्रकृतिरुच्यते
सा च सत्त्वगुणस्य शुद्ध्यविशुद्धिभ्यां द्विधा भिद्यमाना क्रमेण माया चाविद्या च भवति तयोर्मायाविद्ययोः

मायाभासेन जीवेशौ करोतीति श्रुतत्वतः॥ कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितं॥३॥

प्रतिबिंबितं चैतन्यमेवेश्वरो जीवश्चेत्युच्यते॥ तदिदं तत्त्वविवेकाख्ये ग्रंथे श्रीमद्विद्यारण्यगुरुभिर्नि
रूपितं चिदानंदमयब्रह्मप्रतिबिंबसमन्विता॥ तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा सत्त्वशुद्ध्यवि
शुद्धिभ्यां मायाविद्ये च ते मते॥ मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः॥ अविद्यावशगस्त्वन्यस्तद्वै

त॰ दी॰
२

चिश्चादनेकधासाकारणशरीरंस्यादिति॥इममेवार्थमनसिनिधायजीवेशावाभासेनकरोतिमायाचावि-
द्याचस्वयमेवभवतीतिश्रुतिः॥प्रकृत्याऽतोजीवेश्वरयोर्मायाकल्पितत्वमन्यत्तत्त्वंजगत्ताभ्यामेवप्रक-
ल्पितं॥३॥तत्रकेनकियत्कल्पितमित्यतआह॥ईक्षणादिति॥तदैक्षतबहुस्यांप्रजायेयेतिश्रुतमीक्षणमा-

ईक्षणादिप्रवेशांतासृष्टिरीशेनकल्पिता॥जाग्रदादिविमोक्षांतःसंसारोजीवकल्पितः॥४॥

दिर्यस्याःईक्षणादिः॥अनेनजीवेनात्मनानुप्रविश्येतिश्रुतःप्रवेशांतोयस्याःसाप्रवेशांता॥ईक्षणादिश्चा-
सौप्रवेशांताचेतिपश्चात्कर्मधारयः॥सेयंसृष्टिरीश्वरेणकल्पिता॥जाग्रदादिर्यस्यसंसारस्याऽसौजाग्र-
दादिः॥विमोक्षोमुक्तिरंतोयस्यसविमोक्षांतःसंसारोजीवेनकल्पितस्तदभिमानित्वाज्जीवस्येत्यर्थः॥ते- २
चजाग्रदादयइत्यत्रायं[illegible]सएवमायापरिमोहितात्माशरीरमास्थायकरोतिसर्वंस्त्रियन्नपानादिविचित्रभो-

गैःसएवजाग्रत्परितृप्तिमेतिस्वप्नेपिजीवःसुखदुःखभोक्तास्वमाययाकल्पितविश्वलोके॥सुषुप्तिकालेसक-
लेविलीनेतमोभिभूतःसुखरूपमेति॥पुनश्चजन्मांतरकर्मयोगात्सएवजीवःस्वपितिप्रबुद्धः॥पुरत्रयेक्री-
डतियश्चजीवस्ततस्तुजातंसकलंविचित्रं॥जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचंयत्प्रकाशते॥तद्ब्रह्माहमितिज्ञा-

भ्रमाधिष्ठानभूतात्माकूटस्थासंगचिद्वपुः॥अन्योन्याध्यासतोसंगधीस्थजीवोत्रपूरुषः॥५॥

त्वासर्वबंधैःप्रमुच्यतइति॥४॥एवंपुरुषशब्दार्थावबोधोपयोगिनींसृष्टिमभिधायेदानींपुरुषशब्दार्थ-
माह॥भ्रमाधिष्ठानेति॥यःकूटस्थासंगचिद्वपुरविकार्यसंगचित्स्वरूपःभ्रमाधिष्ठानभूतात्माभ्रमस्यदे-
हेंद्रियाद्यध्यासस्याधिष्ठानभूतोऽधिष्ठानत्वेनवर्तमानःपरमात्मास्तिसोसंगएवास्योन्याध्यासतः॥अन्यो-
न्यस्मिन्न॥अन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतराचार्यैर्निरूपितेनतादात्म्याध्यासेनासंगधीस्थजीवःसे-

त॰ टी॰
३

नपारमार्थिकसंबंधशून्यायां बुद्धौ वर्तमानो जीवः सन्नाञ्चस्यां स्थितौ पुरुष इत्युच्यते॥ स वा अयं पुरुषः सर्वा
सु पूर्षु पुरिशय इति श्रुतौ पुरुषशब्दस्य बुध्यादितत्वात्पुरुषस्यैव च पुरुषत्वात्पुरुष एव पुरुषः बुध्यादिक॰
स्यनाधिष्ठानं कूटस्थचैतन्यमेव बुद्धौ प्रतिबिंबितत्वेन प्राप्तजीवभावं सत्पुरुषशब्देनोच्यत इत्यभिप्रायः
य॥ नन्वत्र पुरुषशब्देन केवलचिदाभासरूपो जीव एवोच्यतां किमनेन कूटस्थचैतन्येनाधिष्ठानभूतेनेत्याशं

साधिष्ठानो विमोक्षादौ जीवोऽधिक्रियते न तु॥ केवलो निरधिष्ठानविभ्रांतेः क्वाप्यसिद्धितः॥६॥

क्य तस्य मोक्षाद्यन्वयित्वसिद्ध्ये॥ तदपि स्वीकर्तव्यमित्याह॥ साधिष्ठान इति॥ साधिष्ठानोऽधिष्ठानेन कूटस्थ
चैतन्येन सहितो जीवो विमोक्षादौ विमोक्षस्वर्गादिसाधनानुष्ठानेऽधिक्रियतेऽधिकारी भवति न तु केवलश्चि
दाभासः॥ कुत इत्यत आह॥ निरधिष्ठानेति॥ अधिष्ठानरहितस्यारोप्यस्य लोकेऽदृष्टत्वादिति भावः॥६॥ व॥ ३

इदानीं साधिष्ठानस्यैव तस्य संसाराद्यन्वयित्वं श्लोकद्वयेन विभज्य दर्शयति॥ अधिष्ठानांशसंयुक्तमि
ति॥ जीवो यदाऽधिष्ठानांशसंयुक्तं कूटस्थसहितं भ्रमांशं चिदाभासोपेतं शरीरद्वयमवलंबते स्वस्वरू
पत्वेन स्वीकरोति तदाहं संसारीत्येवं मन्यते॥७॥ यदा पुनर्भ्रमांशस्य देहद्वयसहितस्य चिदाभासस्य ति

अधिष्ठानांशसंयुक्तं भ्रमांशमवलंबते॥ यदा तदाहं संसारीत्येवं जीवोऽभिमन्यते॥७॥
भ्रमांशस्य तिरस्कारादधिष्ठानप्रधानता॥ यदा तदा चिदात्माहमसंगोऽस्मीति बुध्यते॥८॥

रस्कारान्मिथ्यात्वज्ञानेनानादरणादधिष्ठानप्रधानताऽधिष्ठानभूतस्यैव कूटस्थस्य स्वस्वरूपत्वं जीवेन स्वी
क्रियते॥ तदा अहं चिदात्मा त्वसंगश्चास्मीति बुध्यते जानाति॥८॥ नन्वधिष्ठानचैतन्यस्य जीवस्वरूपत्व
स्वीकारे चिदात्माऽहमसंगोऽस्मीति बुध्यत इति यदुक्तं तदनुपपन्नं स्यात् असंगचिद्रूपस्य कूटस्थस्याहं

त॰टी॰
४

प्रत्ययविषयत्वाभावादिति शंकते॥ ॥नासंग इति॥ असंगे चिदात्मन्यविषयेऽहंप्रत्ययो न युज्यते यतोऽ
तः कथमहमस्मीति जानीयान्न कथमपीत्यर्थः॥ मुख्यया वृत्त्याऽहंप्रत्ययविषयत्वाभावेऽपि लक्षणया
तदस्तीति विवक्षुरहंशब्दार्थं तावद्विभजते॥ शृण्विति॥ अहमोऽहंशब्दस्येत्यर्थः॥९॥ कीदृशो मुख्योऽर्थ

नासंगेऽहंकृतिर्युक्ता कथमस्मीति चेच्छृणु॥ एको मुख्यो द्वावमुख्यावित्यर्थस्त्रिविधोऽहमः॥९॥
अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः॥ एकीभूय भवेन्मुख्यस्तत्र मूढाः प्रयुंजते॥१०॥

इत्याकांक्षायां तं दर्शयति॥ अन्योन्येति॥ कूटस्थचिदाभासयोः स्वरूपमन्योन्याध्यासेनैक्यं प्राप्तमहंशब्द
स्य वाच्यत्वेन मुख्यार्थो भवति॥ अस्य कुतो मुख्यत्वमत आह॥ तत्र मूढा इति॥ यत इत्यध्याहारः॥ तत्र त
स्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतोऽविवेकज्ञा अन्यैः सर्वैरप्यहंशब्दः प्रयुज्यतेऽतोऽस्य मुख्य ४

पै

म मित्यर्थः॥१०॥ इदानीममुख्यार्थौ दर्शयति॥ पृथगिति॥ आभासकूटस्थौ प्रत्येकमहंशब्दार्थत्वेन यदा विवक्षि
तौ तदाऽमुख्यार्थौ भवतः॥ अनयोरमुख्यत्वे कारणमाह॥ तत्रेति॥ अत्रापि यत इत्यध्याहारः॥ तत्त्ववित् य
तस्तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लोके लौकिके वैदिके च व्यवहारे पर्यायेण प्रयुंक्त इति योजना॥

पृथगाभासकूटस्थावमुख्यौ तत्र तत्त्ववित्॥ पर्यायेण प्रयुंक्तेऽहंशब्दं लोके च वैदिके॥११॥
लौकिकव्यवहारेऽहं गच्छामीत्यादिके बुधः॥ विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति॥१२॥

अयं भावः चिदाभासकूटस्थयोरविविक्तरूपस्य सर्वजनीनव्यवहारविषयत्वान्मुख्यार्थत्वं विविक्तरूप
त्वस्य तु कतिपयजनैः कदाचिदेव व्यवह्रियमाणत्वादमुख्यार्थत्वमिति॥११॥ पर्यायेण प्रयुंक्त इत्युक्तं लौ म
किकमेवार्थं प्रपंचयति प्रतिपत्तिसौकर्याय श्लोकद्वयेन। लौकिक इत्यादिना॥ बुधो विद्वानहं गच्छामीत्यादिके

त·दी· ५

लौकिकव्यवहारेकूटस्थाचिदाभासंविविच्यतमेवाहंशब्देनविवक्षन्तिवक्तुमिच्छंति॥२२॥अयमेवबुधः
शास्त्रीयदृष्टितोवेदांतश्रवणजनितज्ञानेनकेवलेचिदाभासाद्विविक्तेकूटस्थेऽसंगोहंचिदात्माहमिति
लक्षणयाऽहंशब्दंप्रयुंक्तेअतोलक्षणयाऽहंशब्दार्थत्वेनाहंप्रत्ययविषयत्वसंभवादसंगोहमस्मीति।

असंगोहंचिदात्माहमितिशास्त्रीयदृष्टितः॥अहंशब्दंप्रयुंक्तेयंकूटस्थेकेवलेबुधः॥२३॥
ज्ञानिताज्ञानितेत्वात्माभासस्यैवनचात्मनः॥तथाचकथमाभासःकूटस्थोविशेषणा स्मीतिबुध्यतां
त्॥२४

ज्ञानमनुपपद्यतइत्यभिप्रायः॥२३॥ननुपृथगाभासकूटस्थावहंशब्दस्यामुख्यार्थौविविक्तौ
तयोर्मध्येकूटस्थःकिमज्ञाननिवृत्तयेऽसंगोस्मीतिजानातिकिंवाचिदाभासः।नतावत्कूटस्थःतस्यासं
गचिद्रूपत्वेनज्ञानित्वाज्ञानित्वयोरनुपपत्तेश्चिदाभासस्यज्ञानित्वादिकंवक्तव्यंतथासतिकूटस्थाद ५

न्यश्चिदाभासोहंकूटस्थोस्मीतिनज्ञातुमर्हतीतिशंकते॥ज्ञानितेति॥२४॥तस्यकूटस्थादन्यत्वमेवासिद्ध
मितिपरिहरति॥ ॥नायमिति॥तत्रोपपत्तिमाह॥आभासत्वस्येति।यथादर्पणेप्रतीयमानस्यमुखाभा
सस्यग्रीवास्थमुखमेवतत्त्वंतद्वदितिभावः॥२५॥ननुचिदाभासस्यमिथ्यात्वेतदाश्रितंकूटस्थोस्मीति

नायंदोषश्चिदाभासःकूटस्थैकस्वभाववान्॥आभासत्वस्यमिथ्यात्वात्कूटस्थत्वाविशेष त
णात्॥२५॥कूटस्थोस्मीतिबोधोपिमिथ्याचेन्नेतिकोवदेत्॥नहिसत्यतयाऽभीष्टंरज्जुसर्प
विसर्पणं॥२६॥

ज्ञानमपिमिथ्यास्यादितिशंकते॥कूटस्थइति॥कूटस्थस्वरूपातिरिक्तस्यकृत्स्नस्याऽपिमिथ्यात्वाभ्युपग
मेनतत्रमिथ्यात्वमस्माकमिष्टमेवेतिपरिहरति।नेतीति।उक्तमर्थंदृष्टांतेनस्पष्टयतिनहीतिरज्जौकल्पि
तस्यसर्पस्यगत्यादिकमपिप्रतीयमानंवास्तवंनांगीक्रियतेयथातद्वदितिभावः॥२६॥ व ॥ ॥

त.दी.
६

ज्ञानस्यमिथ्यात्वेतेनसंसारनिवृत्तिर्नस्यादित्याशंक्यनिवर्त्यस्यसंसारस्यापितथात्वात्तन्निवृत्तिरुपपद्य
तेस्वाप्नव्याघ्रदर्शनेननिद्रानिवृत्तिवदित्यभिप्रायेणाह॥ तादृशेनापीति॥ तत्रयादृशोयक्षस्तादृशो
बलिरितिलौकिकगाथांसंवादयति॥ यक्षानुरूपोहीति॥१७॥ उपपादितमर्थमुपसंहरति॥ तस्मादि

तादृशेनापिबोधेनसंसारोविनिवर्त्तते॥ यक्षानुरूपोहिबलिरित्याहुर्लौकिकाजनाः॥१७॥
तस्माद्दाभासपुरुषःसकूटस्थोविविच्यतां॥ कूटस्थोस्मीतिविज्ञातुमर्हतीत्यस्यधाक्षितिः॥१८॥

ति॥ यस्मात्कूटस्थस्यएवचिदाभासस्यनीजंस्वरूपंतस्मात्पुरुषशब्दवाच्यःकूटस्थसहितश्चिदाभासःसकूटस्थं
मिथ्याभूतात्तस्माद्विविच्यलक्षणयाकूटस्थोहमस्मीत्यवगंतुंशक्नोतीत्यभिप्रायेणाक्षतिरस्मीत्युक्तवती॥
त्यर्थः॥१८॥ एवंपुरुषोस्मीतिपदद्वयप्रयोगाभिप्रायमभिधायाऽयमितिपदप्रयोगाभिप्रायमाह॥ ॥अ ६

असंदिग्धाविपर्यस्तबोधोदेहात्मनीक्ष्यते तद्वदत्रेतिनिर्णेतुमयमित्यभिधीयते

संदिग्धेति॥ लौकिकानांप्रसिद्धेदेहरूपस्यात्मनिसंशयविपर्य्ययरहितोऽयमस्मीतिबोधोयद्वदुपजायते
॥ अत्रप्रत्यगात्मनिविषयेतद्वत्तथाविधंज्ञानंमुक्तिसिद्धयेसंपाद्यमितिनिर्णेतुमयमित्यभिधीयतेश्रुतेति
शेषः॥१९॥ ईदृशस्यैवबोधस्यमोक्षसाधनत्वेआचार्यवाक्यंसंवादयति॥ देहात्मेति॥ अहंमनुष्यइतिदेहा

देहात्मज्ञानवज्ज्ञानंदेहात्मज्ञानबाधकं॥ आत्मन्येवभवेद्यस्यसनेच्छन्नपिमुच्यते॥२०॥
अयमित्यपरोक्षत्वमुच्यतेचेत्तदुच्यतां॥ स्वयंप्रकाशचैतन्यमपरोक्षंसदायतः॥२१॥

त्मविषयोदृढप्रत्ययोयथैवंप्रत्यगात्मन्येवदेहात्मेत्येवंदेहात्मत्वज्ञानापबाधनेनब्रह्माहमस्मीतिज्ञानंयस्य
जायतेसविद्वानेच्छन्नपिमोक्षेच्छारहितोपिमुच्यते॥ संसारहेतोरज्ञानस्यज्ञानेनापबाधितत्वादितिभावः॥२
अयमितिपदप्रयोगस्याभिप्रायोनतरेशंकते॥ अयमिति॥ यथाऽयंघटइत्यादिप्रयोगेष्विदमानिर्दिष्टस्यव

तृ.दी.
७

स्तुतत्वापरोक्ष्यं दृष्टं तथायमस्मीत्यत्रापीति भावः। तदप्यस्माकमिष्टमेवेत्याह॥ तदुच्यतामिति॥ कुत इत्यत
आह॥ स्वयंप्रकाशेति। साधनांतरनिरपेक्षतयाऽवभासमानं चैतन्यं व्यवधायकाभावान्नित्यमपरोक्षमित्य
स्मान्निरस्तुपपन्नत्वादित्यर्थः॥२१॥ नन्वात्मनः स्वप्रकाशचिद्रूपत्वेन नित्यापरोक्षस्यास्तूपपन्नमेऽयमिति प्रदश्र
योगस्याभिप्रायवर्णनांगीकारबलादागतमात्मनः परोक्षविषयत्वमपरोक्षविषयत्वं पूर्वोक्तं ज्ञानाज्ञाना

परोक्षमपरोक्षं च ज्ञानमज्ञानमित्यदः॥ नित्यापरोक्षरूपेऽपि द्वयं स्याद्दशमे यथा॥२२॥

अथ विषयत्वं चानुपपन्नमित्याशंक्य दशम इव सर्वमुपपत्स्यत इत्याह॥ परोक्षमिति। परोक्षमपरोक्षं चेत्ये
कं युगलं ज्ञानमज्ञानमित्यपरं इदं द्वयं नित्यापरोक्षरूपेऽप्यात्मनि दशम इव स्यादित्यर्थः॥२२॥ दृष्टांतं व्यु
त्पादयति। नवसंख्येति। परिगणनीयपुरुषनिष्ठया नवसंख्ययाऽपहृतविवेकज्ञानो दशमस्तदानीं स्वप ७

रिगणनीयान्नवसंख्याकान्वीक्षमाणोऽपि स्वमकृत्वा पश्यन्नपि भ्रांत्या गणनाकर्त्तारं स्वमात्मानं दशमोऽहमस्मी
ति न वेत्तीत्यर्थः॥२३॥ एवं दशमेऽज्ञानं प्रदर्श्य तत्कार्यमावरणं दर्शयति॥ न भातीति। तदा दशमः स्वं दश
मं संतं दशमो न भाति नास्तीति मत्वा वक्त्यस्य व्यवहारस्य यत्कारणं तदज्ञानकृतमज्ञानकार्यमावरणं वि

नवसंख्याहृतज्ञानो दशमो विभ्रमात्तदा॥ न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव॥२३॥
न भाति नास्ति दशम इति स्वं दशमं तदा॥ मत्वा वक्ति तदज्ञानकृतमावरणं विदुः॥२४॥

दुर्बुधा इति शेषः॥२४॥ अज्ञानस्यैव कार्यविशेषं विक्षेपं दर्शयति॥ नद्यामिति॥ २५ दशमस्यासत्वांशनिव
र्त्तकं परोक्षज्ञानमाह॥ न मृत इति॥२६॥ तस्यैवाभानांशनिवर्त्तकमपरोक्षज्ञानं दर्शयति॥ त्वमेवेति॥
त्वेन परिगणितैर्नवभिः सह स्वात्मानं गणयित्वा त्वमेव दशमोऽसीति प्रदर्शितोऽहं दशमोऽस्मीत्यपरोक्षत

त. दी.
८

याज्ञात्वा हर्षं प्राप्नोति रोदनं च समुज्झति॥२७॥ एवं दृष्टांतभूते दशमे प्रदर्शितमवस्थासप्तकमन्यत्र दार्ष्टांतिके
आत्मन्यपि योजनीयमित्याह॥ अज्ञानावृतीति॥ अज्ञानं चावृतिश्च विक्षेपश्च द्विविधं बोधेन च तृप्तिश्चेति द्वंद्व समासः॥२८॥ तत्रात्मन्य

नद्यां ममार दशम इति शोचन्प्ररोदिति॥ अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः॥२५॥ न मृतो
दशमोऽस्तीति श्रुत्वाप्तवचनं तदा॥ परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत्॥२६॥ त्वमेव दशमो
सीति गणयित्वा प्रदर्शितः॥ अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति॥२७॥ अज्ञानावृतिविक्षे
पद्विविधज्ञानतृप्तयः॥ शोकापगम इत्येते योजनीयाश्चिदात्मनि॥२८॥ संसारासक्तचित्तः स
श्चिदाभासः कदाचन॥ स्वयंप्रकाशकूटस्थं स्वतत्त्वं नैव वेत्त्ययं॥२९॥

ज्ञानादिक्रमेण दर्शयति॥ संसारासक्तेत्यादिना॥ अयं चिदाभासो विषयसंपादनादिषासक्तचित्तः सन्कदा ८

चन्न कृतिविचारात्पूर्वं कदाचित्स्वतत्त्वं स्वस्य निजं रूपं कूटस्थं प्रत्यगात्मानं नैव वेत्ति न जानातीति यत्तदज्ञानं
॥२९॥ चिदाभासविषये प्रसंगे जाते कूटस्थो नास्ति न भातीति मत्वा वक्ति इदमज्ञानकार्यमावरणं कूटस्थास
त्वाभानाभिधानवत्कर्तृत्वादिकमात्मन्यारोपयति॥ अस्यारोपस्य हेतुर्हृदयस्थश्चिदाभासो विक्षेपः॥३०

न भाति नास्ति कूटस्थ इति वक्ति प्रसंगतः॥ कर्ता भोक्ताहमस्मीति विक्षेपं प्रतिपद्यते॥३०॥
अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्तया॥ पश्चात्कूटस्थ एवास्मीत्येवं वेत्ति विचारतः॥३१॥
कर्ता भोक्तेत्येवमादिशोकजातं प्रमुंचति॥ कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तुष्यति॥३२॥

परेण बोधितः कूटस्थोऽस्तीति जानातीदं परोक्षज्ञानं। श्रवणादिपरिपाकवशात्कूटस्थोऽहमेवास्मीति
जानातीदमपरोक्षज्ञानं॥३१॥ कूटस्थात्मज्ञानानंतरं कर्तृत्वादिशोकजातं त्यजतीत्याह यं शो
कापगमः॥ कृत्यं कर्तव्यं जातं कृतं निष्पादितं। प्रापणीयं फलजातं प्राप्तमेवेति तुष्यतीयं तृप्तिरित्यर्थः

उक्तस्यार्थस्य पुनः कथने अनुवादः

तृ.दी.
८

द्दार्ष्टान्तिके पूक्तमवस्थासप्तकमनुवदति । अज्ञानमिति । ननूक्तावस्थासप्तकस्यात्मधर्मत्वांगीकारे तस्य कू
टस्य तत्त्वं व्याहन्येतेत्याशंक्याह । एताः सप्तावस्थाश्चिदाभासस्यैव न कूटस्थस्येत्याह । सप्तावस्था इति । सर्वं
वाक्यं सावधारणमिति न्यायेन न कूटस्थस्यैवेत्यवगम्यते । आसामत्रोपन्यासो हयेत्याशंक्यनह्याबंध

अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः ॥ अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशा ॥३३॥
सप्तावस्था इमाः संति चिदाभासस्य तास्विमौ ॥ बंधमोक्षौ स्थितौ तत्र तिस्रो बंधकृतः स्मृताः ॥३४॥

मोक्षकारित्वद्योतनफलत्वादुपन्यासस्येत्यभिप्रायेणाह ॥ तास्विमाविति । किमासां सप्तानामप्यविशेषेण
बंधकारित्वं मोक्षकारित्वं नेत्याह । तत्रेति । तिस्र इति । अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः ॥३४॥ आसां बं
धकारित्वदर्शनाय तिसृणामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टीचिकीर्षुरज्ञानस्य स्वरूपं तावद्दर्शय ८

ति । न जानामीति । आत्मतत्त्वविचारस्य प्रागभावसहितमुदासीनव्यवहारस्य कारणं न जानामीत्यनुभू
यमानमज्ञानमीरितमित्यर्थः ॥३५॥ आवृतिकार्यं दर्शयति । अमार्गेणेति । शास्त्रोक्तप्रकारमतिलंघ्य
केवलं तर्केण विचार्यानंतरं कूटस्थो नास्ति न भातीत्येवंरूपो विपरीतव्यवहार आवृतिकार्यमित्यर्थः

न जानामीत्युदासीनव्यवहारस्य कारणं ॥ विचारप्रागभावेन युक्तमज्ञानमीरितं ॥३५॥ अमा
र्गेण विचार्याथ नास्ति नो भाति चेत्यसौ ॥ विपरीतव्यवहृतिरावृतेः कार्यमिष्यते ॥३६॥ देहद्व
यचिदाभासरूपो विक्षेप ईरितः ॥ कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बंधनः ॥३७॥

॥३६॥ विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति । देहद्वयेति । स्थूलसूक्ष्माख्यशरीरद्वयसहितश्चिदाभास एव वि
क्षेपः बंधनः बंधहेतुः संसाराख्यः कर्तृत्वाद्यखिलः शोकोऽस्य चिदाभासस्य कार्यमिति शेषः । कर्तृत्वादित्यादि

शृङ्गेनप्रमाणत्वादयोगइत्यर्थः॥३७॥ ननुसत्तावस्थाश्चिदाभासस्येत्युक्तमनुपपन्नं अज्ञानावरणयोर्विक्षेपो
त्पत्तेः पुरास्थितत्वाच्चिदाभासस्य च विक्षेपांतःपातित्वात्तदवस्थात्वानुपपत्तेरित्याशंक्याह॥ अज्ञानमिति॥
अनयोर्विक्षेपात्पुरास्थितत्वेपि नात्मावस्थात्वं। तस्यासंगत्वेनावस्थावत्त्वानुपपत्तेः अतः परिशेषाच्चिदाभा-

अज्ञानमावृतिश्चैते विक्षेपात्प्राक्प्रसिध्यतः॥ यद्यप्यथाप्यवस्थे ते विक्षेपस्यैव नात्मनः॥३८॥
विक्षेपोत्पत्तितः पूर्वमपि विक्षेपसंस्कृतिः॥ अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः॥३९॥ ॥

सावस्थात्वमेतयोर्वक्तव्यमिति भावः॥३८॥ अवस्थावतो विक्षेपस्य तदानीमभावात्तदवस्थात्वाभिधानमनु-
पपन्नमित्याशंक्य विक्षेपाभावेपि तत्संस्कारस्य तदानीं सत्त्वाद्विक्षेपावस्थाभिधानं न विरुध्यत इत्याह॥ विक्षे-
पेति॥ ततः कारणात्तयोस्तदवस्थात्ववर्णनमविरुद्धमिति योजना॥३९॥ नन्वप्रसिद्धसंस्कारानुपगमद्वा १०

राविक्षेपावस्थात्ववर्णनाद्वरमधिष्ठानतया प्रसिद्धब्रह्मावस्थात्ववर्णनमित्याशंक्यातिप्रसंगान्नैवमि-
तिपरिहरति॥ ब्रह्मणीति॥४०॥ ननु ब्रह्मण्यारोपितस्याविशेषेपि विक्षेपोत्तरकालभाविनीनां
संसारित्वाद्यवस्थानां जीवाश्रितत्वेनानुभूयमानत्वान्न ब्रह्मावस्थात्वमिति शंकते संसारीति॥ संसारी

ब्रह्मण्यारोपितत्वेन ब्रह्मावस्थे इमे इति॥ न शंकनीयं सर्वासां ब्रह्मण्येवाधिरोपणात्॥४०॥
संसार्यहं विबुद्धोहं निःशोकस्तुष्ट इत्यपि॥ जीवगा उत्तरावस्था भांति न ब्रह्मगा यदि॥४१॥

कर्तृत्वादिधर्मवान् विबुद्धस्तत्त्वसाक्षात्कारवान् निःशोकः शोकरहितः तुष्टो वक्ष्यमाणकृतकृत्यत्वादिज-
नितसंतोषवानहमस्मीत्युत्तरावस्था जीवगा जीवाश्रिता भांति न ब्रह्माश्रिता इत्यर्थः॥४१॥ व ॥ ॥
एवं तर्ह्यज्ञानावरणयोरपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्थात्वमेवेति परिहरति॥ तर्ह्यज्ञइति

तृ·दी·
११

मद्दृष्टितोममानुभवेनेत्यर्थः॥४२॥ ननुतर्ह्यज्ञानाश्रयत्वंब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्यतद्वि
वक्षांदर्शयति। अज्ञानस्येति। ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षयातदाश्रयत्वमुक्तमित्यर्थः। नन्व॰
ज्ञिस्तर्हिकिंविवक्षयाजीवावस्थात्वमुक्तमित्याशंक्यस्वविवक्षांदर्शयति॥ जीवावस्थात्वमिति॥४३॥

तत्त्वज्ञोहंब्रह्मसत्त्वभानेमद्दृष्टितोनहि॥ इतिपूर्वेअवस्थेऽवभासतेजीवगेखलु॥४२॥
अज्ञानस्याश्रयोब्रह्मेत्यधिष्ठानतयाजगुः॥ जीवावस्थात्वमज्ञानाभिमानित्वादवादिषं
॥४३॥ ज्ञानद्वयेननष्टेस्मिन्नज्ञानेतत्कृतावृतिः॥ नभातिनास्तिचेत्येषाद्विविधापिविनश्य
ति॥४४॥

एवंबंधहेतुमवस्थात्रयंप्रदर्श्यावशिष्टावस्थासुमध्येपूर्वोक्ताज्ञानावरणनिवृत्तिद्वारामु
क्तिहेतुमवस्थाद्वयंदर्शयति॥ ज्ञानद्वयेनेति। परोक्षत्वापरोक्षत्वलक्षणेनज्ञानद्वयेनावरणकारणेअ॰ ११

ज्ञानेननष्टेसतितत्कृतावृत्तिस्तेनाज्ञानेनोत्पादितंनभातिनास्तीतिव्यवहारकारणंद्विविधमप्यावरणंका
क २ रणाभावान्नश्यतीति॥४४॥ अस्यांशस्यकेननिवृत्तिरित्यपेक्षायामुभयंविभज्यदर्शयति॥ परोक्षज्ञान
तइति॥ कूटस्थोस्तीत्येवंरूपात्परोक्षज्ञानादज्ञानस्यासत्त्वावरणकारणत्वंनिवर्त्तते॥ कूटस्थोस्मीत्यप

परोक्षज्ञानतोनश्येदसत्त्वावृतिहेतुता॥ अपरोक्षज्ञाननाश्याह्यभानावृतिहेतुता॥४५॥ अ
भानावरणेनष्टेजीवत्वारोपसंक्षयात्॥ कर्तृत्वाद्यखिलःशोकःसंसाराख्योनिवर्त्तते॥४६॥

रोक्षज्ञानेनतुकूटस्थोनभातीत्येवंरूपावरणकारणत्वंनिवर्त्तते॥४५॥ इदानींज्ञानस्यफलरूपावस्थाद्व॰
यंप्रथमावस्थामाह॥ अभानेति। अभानावरणेनिवृत्तेभ्रांत्याप्रतीयमानस्यजीवत्वस्यापिनिवृत्तत्वात्त॰
न्निमित्तकःकर्तृत्वादिलक्षणःसंसाराख्यःशोकःसर्वोपिनिवर्त्ततइत्यर्थः॥४६॥

एवं शोकापगमरूपामवस्थां प्रदर्श्य निरंकुशतृप्तिलक्षणां तृतीयां दर्शयति । निवृत्त इति ॥ ४७ ॥ नन्वा-
त्मानं चेद्विजानीयादिति मंत्रव्याख्याने प्रवृत्तत्वाद्विहाय मध्ये ज्ञानाद्यवस्थासप्तकनिरूपणं प्रकृतासंग-
तमित्याशंक्यात्मानं चेदित्यस्याः श्रुतेस्तात्पर्यनिरूपणशेषत्वेनाभिहितत्वान्न प्रकृतासंगतमित्यभिप्रेत्य

निवृत्ते सर्वसंसारे नित्यमुक्तत्वभासनात् ॥ निरंकुशा भवेत्तृप्तिः पुनः शोकासमुद्भवात् ॥ ४७ ॥
अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे ॥ अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिः ॥ ४८ ॥

श्रुतितात्पर्यमाह । अपरोक्षेति । चिदाभासनिष्ठं यदवस्थासप्तकमस्ति तत्रापरोक्षज्ञानशोकनिवृत्तिल-
क्षणमवस्थाद्वयं प्रतिपादयितुमयं मंत्रः प्रवृत्त इत्यभिप्रायः ॥ ४८ ॥ अयमित्यपरोक्षत्वमित्यत्राय-
मिति पदेनात्मनोऽपरोक्षत्वमुच्यत इत्युक्ते तथासत्यपरोक्षज्ञानविषयत्वमेव स्यान्न परोक्षज्ञानवि-

षयत्वमित्याशंक्य तदुपपादनायापरोक्षज्ञानं विभज्यते ॥ अयमिति । द्वैविध्ये कारणमाह । विषयेति
विषयस्य चिद्रूपस्यात्मनः स्वप्रकाशत्वात्स्वव्यवहारे साधनांतरनिरपेक्षत्वाद्धिया बुध्याप्येवं स्व

अयमित्यपरोक्षत्वमुक्तं तद्द्विविधं भवेत् ॥ विषयस्वप्रकाशत्वाद्धियाप्येवं तदीक्ष-
णात् ॥ ४९ ॥ परोक्षज्ञानकालेपि विषयस्वप्रकाशता ॥ समा ब्रह्मस्वप्रकाशमस्तीत्येवं वि-
बोधनात् ॥ ५० ॥

प्रकाशत्वेन तदीक्षणात्तस्य विषयस्यात्मनोवलोकनाच्चेत्यर्थः ॥ ४९ ॥ भवतु द्वैविध्यमेतावता परोक्षज्ञा-
नविषयत्वे किमायातमित्याशंक्य विषयस्वप्रकाशत्वं परोक्षज्ञानविषयत्वविरोधि न भवतीत्याह ॥
परोक्षेति ॥ अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेपि विषयस्य ब्रह्मणः स्वप्रकाशतास्त्येवात्रोप-
पत्तिमाह ॥ ब्रह्मेति । ५०

तृ॰ दी॰
१२

प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कुतः परोक्षत्वमित्याशंक्याऽऽ प्रत्यगंशाग्रहणादित्याह ॥ अहं ब्रह्मेति
नन्विदं भ्रान्तमित्याशंक्यास्य भ्रान्तत्वं किं बाध्यत्वादुत व्यक्त्युल्लेखाद्यद्वाऽपरोक्षेणाग्रहणयोग्यस्य पारो
क्ष्येणाग्रहणाद्वांशाग्रहणादिति चतुर्धा विकल्प्य प्रथमं प्रत्याह ॥ एतन्नन्वेति ॥ ५१ ॥ हेतुं विवृणोति ॥ ब्रह्मणा

अहं ब्रह्मेत्यनुल्लिख्य ब्रह्मास्तीत्येवमुल्लिखेत् ॥ परोक्षज्ञानमेतन्न भ्रान्तं बाधानिरूपणात् ॥ ५१
ब्रह्म नास्तीति मानं चेत्स्याद्बाध्येत तदा ध्रुवं ॥ न चैवं प्रबलं मानं पश्यामोऽतो न बाध्यते ॥ ५२ ॥
व्यक्त्यनुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि ॥ भ्रान्तिः स्याद्व्यक्त्युल्लेखात्सामान्योल्लेखदर्शनात् ॥ ५३

नास्तीति ॥ ५२ ॥ द्वितीयमतिप्रसंगेन दूषयति ॥ व्यक्त्यनुल्लेखेति ॥ अयं स्वर्ग इत्येवमाकारग्रहणाभावात्किं
तु स्वर्गोऽस्तीत्येवं सामान्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसंग इत्यर्थः ॥ ५३ ॥ ठ ॥ ॥ १२

तृतीयं निराकरोति ॥ अपरोक्षत्वेति ॥ अपरोक्षत्वेन ग्रहणयोग्यस्य प्रत्यगभिन्नब्रह्मविषयस्य परोक्ष
ज्ञानस्य भ्रमत्वं न संभवति ॥ कुत इत्यत आह ॥ परोक्षमिति ॥ ब्रह्म परोक्षमित्येवमाकारेण ग्रहणाभा
वात् ॥ कुतस्तर्हि तस्य परोक्षत्वमित्याशंक्याह ॥ अर्थादिति ॥ इदं ब्रह्मेत्येवं व्यक्त्युल्लेखाभावसामर्थ्यात्परो

अपरोक्षत्वयोग्यस्य न परोक्षमतिर्भ्रमः ॥ परोक्षमित्यनुल्लेखादर्थात्पारोक्ष्यसंभवात् ॥ ५४ ॥
अंशाग्रहीति भ्रान्तिश्चेद्घटज्ञानं भ्रमो भवेत् ॥ निरंशस्यापि सांशत्वं व्यावर्त्यांशविभेदतः ॥
५५

क्षत्वसिद्धेरिति भावः ॥ ५४ ॥ चरममाशंकते ॥ अंशाग्रहीति ॥ ब्रह्मांशाग्रहणेऽपि प्रत्यगंशाग्रहणात्त्व
मित्यर्थः ॥ एवं तर्हि घटादिज्ञानस्यापि भ्रमत्वप्रसंग इति परिहरति ॥ घटेति ॥ आन्तरावयवानामग्रहणा
दिति भावः ॥ ननु घटस्य सावयवत्वादंशाग्रहणं संभवति ॥ ब्रह्मणस्तु निरंशत्वात्कथमंशाग्रहणसंभव इत्या

शंकयाव्यावर्त्यांशोपाधिनिमित्तकं सांशत्वं तस्य भविष्यतीत्याह। निरंशस्येति॥५५॥ तौ कौ व्यावर्त्यांशावित्या-
कांक्षायामाह। असत्त्वांश इति॥५६॥ अपरोक्षत्वेन यद्ग्रहणयोग्यं विषयं परोक्षज्ञानं भ्रमो न भवतीत्येत
द्दृष्टांतप्रदर्शनेनापि द्रढयति। दशमोऽस्तीति। दशमोऽस्तीत्याप्तवाक्यजन्यं ज्ञानमभ्रांतं यथा। ब्रह्मास्तीति वा

असत्त्वांशो निवर्त्येत परोक्षज्ञानतस्तथा॥ अभानांशनिवृत्तिः स्यादपरोक्षधियाकृता॥५६॥
दशमोऽस्तीत्यविभ्रांतं परोक्षज्ञानमीक्ष्यते॥ ब्रह्मास्तीत्यपि तद्वत्स्यादज्ञानावरणे समे॥५७॥

क्यजन्यज्ञानमपि तद्वदभ्रांतं तेन तस्मादज्ञानकृतस्यासत्त्वावरणांशस्य समत्वादिति भावः॥५७॥ ननु वा
क्यात्परोक्षज्ञानमुत्पद्यते चेदपरोक्षज्ञानं कुतो जायत इत्याशंक्य विचारसहिताद्वाक्यादेवेत्याह॥ आ
त्मा ब्रह्मेतीति। अयमात्मा ब्रह्मेति महावाक्यार्थे सम्यग्विचार्यमाणे पूर्वमस्तीति। परोक्षतयाऽवग १४

तस्य ब्रह्मणः प्रत्यगभिन्नत्वं साक्षात्क्रियते। तच्च दृष्टांतः। यद्वदिति। दशमस्त्वमसीत्यतो वाक्यादात्मनि दशम
त्वं यथा साक्षात्क्रियते तद्वदित्यर्थः॥५८॥ विचारसहकृतेन वाक्येनापरोक्षज्ञानोत्पत्तिप्रकारं तावद्दृष्टां
तेन दर्शयति॥ दशम इति। त्वयास्तीति निरूपितो दशमः क इति प्रश्ने कृते तस्य त्वमेवेति परिहारेऽभिहि

आत्मा ब्रह्मेति वाक्यार्थे निःशेषेण विचारिते॥ व्यक्तिरुल्लिख्यते यद्वद्दशमस्त्वमसीत्यतः॥
५८॥ दशमः क इति प्रश्ने त्वमेवेति निराकृते॥ गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत्॥५९॥
दशमोऽस्मीति वाक्योत्था न धीरस्य विहन्यते॥६०॥

ते स्वात्मना सहितान्नव गणयित्वाऽहं दशमो-
ऽस्मीति स्वयमेव दशमं स्मरेदित्यर्थः॥५९॥ अस्य दशमोऽस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वान्न वि
पर्ययादिरूपतेत्याह। दशमोऽस्मीति। अस्य दशमस्य त्वमेव दशमोऽस्मीति वाक्यात्परिगणनादिजन्यगवि

चारसहितादुत्पन्नाऽहं दशमोस्मीति बुद्धिर्न विहन्यते न केनाऽपि ज्ञानेन बाध्यते। परिगणनक्रियायां च न
वानामादिमध्यावसानेषु स्वपरिगणनेप्यहं दशमो न वेति संशयश्च न भवेदतः सा दृढापरोक्षरूपेत्यर्थः
॥६०॥ एतत्सर्वं दार्ष्टान्तिके योजयति। सदेवेत्यादिना। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादि

आदिमध्यावसानेषु न नवत्वस्य संशयः ॥६०॥ सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः ॥
गृहीत्वा तत्त्वमस्यादिवाक्याद्व्यक्तिं समुल्लिखेत् ॥६१॥ आदिमध्यावसानेषु स्वस्य ब्रह्मत्व
धीरियं ॥ नैव व्यभिचरेत्तस्मादापरोक्ष्यं प्रतिष्ठितं ॥६२॥

वाक्येन ब्रह्मसद्भावं प्रथमं निश्चित्य तत्
स्य जीवरूपेण प्रवेशादियुक्तिपर्यालोचनया प्रत्यग्रूपत्वं संभाव्य तत्त्वमसीत्यादिवाक्येनाद्वितीयब्रह्मरू
पमात्मानमहं ब्रह्मास्मीति साक्षात्कुर्यादित्ययमात्मनो ब्रह्मत्वबुद्धिः पंचानां कोशानामादिमध्यावसानेषु

त्मनो व्यवहारेपि नैवान्यथा भवत्यतोस्या बुद्धेरपरोक्षज्ञानत्वं सुस्थितमित्यर्थः ॥६२॥ नन्वेवं प्रथमतः केवल
वाक्यात्परोक्षज्ञानमुत्पद्यते पश्चाद्विचारसहितादपरोक्षज्ञानमित्येतत्कुतोवगम्यत इत्याशंक्य तैत्तिरीयका
दिश्रुत्यर्थपर्यालोचनयेत्याह। जन्मादीति। भृगुर्नामकः कश्चिदृषिः पुरा यतो वा इमानि भूतानि जायंते

जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा ॥ परोक्षेण गृहीत्वाथ विचाराद्व्यक्तिमैक्षत ॥६३
यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता ॥ तथाप्यन्नं प्राणमिति विचार्यस्थलमुक्तवान् ॥६४॥

येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्यश्रुतेन जगज्जन्मादिकारणत्वा
ख्यलक्षणेन जगत्कारणं ब्रह्म परोक्षतयावगम्यान्नमयादिपंचकोशविचाराद्व्यक्तिं प्रत्यगात्मनो रूपं ब्र
ह्मदृष्टवानित्यर्थः ॥६३॥ नन्वस्मिन्प्रकरणे त्वं ब्रह्मासीत्येवमाद्युपदेशवाक्याभावात्कथं भृगोरात्मतत्त्व

त॰दी॰ साक्षात्कार इत्याशंक्यात्मसाक्षात्कारहेतुविचारयोग्यस्थलप्रदर्शनादित्याह॥ यद्यपीति॥६४॥ नन्वन्नम
१६ यादिकोशेषुविचारितेषुप्रतीचःसाक्षात्कारोभवतुब्रह्मणस्तुकथमित्याशंक्यप्रतीचएवब्रह्मत्वात्पं
चकोशविचारेणानंदात्मव्यक्तिसाक्षात्कृत्यानंदाध्येवखल्विमानिभूतानिजायंतेआनंदेनजातानिजीवं

अन्नप्राणादिकोशेषुसुविचार्यपुनःपुनः॥ आनंदव्यक्तिमीक्षित्वाब्रह्मलक्ष्माऽप्ययोजयत्॥६५॥
सत्यंज्ञानमनंतंचेत्येवंब्रह्मस्वलक्षणम्॥ उक्त्वागुहाहितत्वेनकोशेष्वेतत्प्रदर्शितम्॥६६॥ ब॥

तिआनंदंप्रयंत्यभिसंविशंतीत्येवंब्रह्मलक्षणमपिप्रतीच्येवंयोजितवानित्याह॥ अन्नप्राणादीति॥६५॥
ननुब्रह्मलक्षणस्यानंदात्मरूपेप्रतिवियोजनंनघटतेब्रह्मणःतटस्थत्वेनप्रतीचोभिन्नत्वादित्याशंक्यन आत्मा
भेदःसत्यादिलक्षणस्यब्रह्मणःप्रत्यग्रूपेणावस्थानश्रवणादित्याह॥ सत्यंज्ञानमिति॥ सत्यंज्ञानमनंतं १६

ब्रह्मेत्येवंब्रह्मस्वलक्षणंब्रह्मणःस्वरूपलक्षणमभिधाययोवेदनिहितंगुहायांपरमेव्योमन्नित्यने
नवाक्येनपंचकोशगुहांतःस्थितत्वेनतस्यैवप्रत्यग्रूपत्वमभिहितमित्यर्थः॥६६॥ एवंतैत्तिरीयक
श्रुतिपर्यालोचनयाभृगोःपरोक्षज्ञानपूर्वकंविचारजन्यत्वंसाक्षात्कारस्यदर्शयित्वाछांदोग्यश्रुतिपर्या

पारोक्ष्येणविबुध्येंद्रोयआत्मेत्यादिलक्षणात्॥ अपरोक्षीकर्तुमिच्छंश्चतुर्वारंगुरुंययौ॥
॥६७॥

लोचनयापितद्दर्शयति। पारोक्ष्येणेति। इंद्रोयआत्मापहतपाप्माविजरोविमृत्युर्विशोकइत्यादिवाक्य
प्रतिपादितेनलक्षणेनात्मानंपरोक्षतयावगम्यविचाराच्छरीरत्रयनिराकरणेनतत्साक्षात्कारणा
यगुरुंब्रह्माणंचतुर्वारमुपसन्नइतिछांदोग्योपनिषद्यष्टमाध्यायेश्रूयते॥६७॥ इदानीमैतरेयकश्रु

तावपि तद्दर्शयति। आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषदित्यनेन वाक्येन ब्रह्मणो लक्षण
मभिधाय स ईक्षत लोकान्नु सृजा इत्युपक्रम्य तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथोयमाव
सथोयमावसथ इत्यनेन परमात्मनि जगदध्यारोपणप्रकारमभिधाय स जातो भूतान्यभिव्यैख्यत्

आत्मा वा इदमित्यादौ परोक्षं ब्रह्म लक्षितं॥ अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितं॥६८॥
अवांतरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत्॥ सर्वत्रैव महावाक्यविचारात्त्वपरोक्षधीः॥६९॥

किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्श
मितीति प्रत्यगात्मनो ब्रह्मरूपत्वमभिहितं पुनश्च पुरुषे ह वा इत्यादिना ज्ञानसाधनवैराग्यजननाय
गर्भवासादिदोषं प्रदर्श्य कोयमात्मेति वयमुपास्महे इत्यादिविचारेण तत्त्वंपदपदार्थपरिशोधनपु १७

रःसरं प्रज्ञानं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं दर्शितमित्यर्थः॥६८॥ उक्तं न्यायमितरासु श्रुतिष्वप्य
तिदिशति। अवांतरेणेति। सर्वत्र सर्वासु श्रुतिष्वित्यर्थः॥६९॥ ननु महावाक्यविचारस्यापरोक्षज्ञान
जनकत्वस्य कपोलकल्पितमित्याशंक्य वाक्यवृत्त्या वाचार्यैस्तथा प्रतिपादितत्वान्नैवमित्याह। ब्रह्मा

ब्रह्मापरोक्षसिद्ध्यर्थं महावाक्यमितीरितं॥ वाक्यवृत्तावतो ब्रह्मापरोक्षे विमतिर्न हि॥७०॥
आलंबनतया भाति योस्मत्प्रत्ययशब्दयोः॥ अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः॥७१॥

परोक्षेति। अतो वाक्याद्ब्रह्मापरोक्षज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः॥७०॥ वाक्यवृत्तावुपपादनप्रकारं दर्श
यति॥ आलंबनतयेति। योंतःकरणसंभिन्नबोधोंतःकरणोपाधिकश्चिदात्मा अस्मत्प्रत्ययशब्दयोरह
मितिज्ञानस्याहमिति शब्दस्य चालंबनतया विषयत्वेन भाति स तथाविधो बोधस्त्वंपदाभिधस्त्वमिति प

इममभिधावाचकं यस्य स त्वंपदाभिधस्त्वंपदवाच्य इत्यर्थः॥७१॥ एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्या-
र्थमाह॥ मायोपाधिरिति। परोक्षशबलः परोक्षत्वधर्मविशिष्ट इत्यर्थः॥ एवं तटस्थलक्षणमभिधाय
स्वरूपलक्षणमाह॥ सत्याद्यात्मक इति। सत्यमादिर्येषां ज्ञानादीनां ते सत्यादयः आत्मा स्वरूपं यस्य स त

मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः॥ परोक्षशबलः सत्याद्यात्मकस्तत्पदाभिधः॥७१॥
प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता॥ विरुध्येते यतस्तस्माल्लक्षणा संप्रवर्त्तते॥७२॥

था विधस्तत्पदाभिधस्तत्पदमभिधावाचकं यस्य स तत्पदाभिधस्तत्पदवाच्य इत्यर्थः॥७१॥ एवं पदा-
र्थावभिधाय वाक्यार्थबोधनाय लक्षणेह त्रिराश्रयणीयेत्याह॥ प्रत्यगिति। प्रत्यक्त्वपरोक्षत्वे सद्वितीयत्वे
न सद्विता पूर्णते ति मध्यमपदलोपी समासः॥ सद्वितीयपूर्णते च एकस्य वस्तुनो यतो विरुध्येते ततो लक्ष- १८
णेह त्रिराश्रयणीयेत्यर्थः॥७२॥ सा च कीदृशीत्यत आह॥ तत्वमस्यादिति। भागलक्षणा भागत्यागलक्षणे-

त्यर्थः॥ तत्र दृष्टान्तः॥ सोयमिति। सोयं देवदत्त इति वाक्यस्थयोः सोयमिति पदयोर्यथा जहदजहल्लक्षणाश्रि-
ता नापरा जहल्लक्षणा नाप्यजहल्लक्षणा तद्वदत्रापीत्यर्थः॥७३॥ ननु गामानयेत्यादिवाक्येषु लक्षणां हित्वा
विनापि वाक्यार्थबोधो दृश्यते तद्वदत्रापि किं न स्यादित्यत आह॥७४॥ संसर्ग इति। यथा लोके गामानयेत्या

तत्वमस्यादिवाक्येषु लक्षणा भागलक्षणा॥ सोयमित्यादिवाक्यस्थपदयोरिव नापरा॥७३॥ संस-
र्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः॥ अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः॥७४॥ ब॥

दौ पदैः स्मारितानामाकांक्षासंनिध्यादिमतां गवादिपदार्थानामन्वयो वाक्यार्थत्वेन स्वीकृतो यथा वा
नीलं महत्सुगंधमुत्पलमित्यादौ नीलत्वादिविशिष्टस्योत्पलस्य वाक्यार्थत्वं स्वीकृतं नैवमत्र महावाक्ये
षु संसर्गविशिष्टयोरन्यतरस्य वाक्यार्थत्वमभ्युपगम्यते किंतु अखंडैकरसत्वेन स्वगतादिभेदशून्यत्व

स्तुमात्ररूपेणवाक्यार्थोविद्वद्भिरभ्युपेयतेऽतोलक्षणाश्रयणीयेत्यर्थः॥७४॥अखंडैकरसंवाक्यार्थंदर्शय
ति।प्रत्यग्बोधइति।यःप्रत्यग्बोधःसर्वांतरश्चिदात्माआभातिबुद्ध्यादिसाक्षित्वेनस्फुरतिसोऽद्वयानंदलक्ष
णोऽद्वितीयआनंदरूपःपरमात्मेत्यर्थः॥अद्वयानंदरूपश्चतथाविधःपरमात्माप्रत्यग्बोधैकलक्षणश्चि

प्रत्यग्बोधोयआभातिसोऽद्वयानंदलक्षणः॥अद्वयानंदरूपश्चप्रत्यग्बोधैकलक्षणः॥७५॥
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदाभवेत्॥अब्रह्मत्वंत्वमर्थस्यव्यावर्तेततदैवहि॥७६॥
तदर्थस्यचपारोक्ष्यंयद्येवंकिंततःशृणु॥पूर्णानंदैकरूपेणप्रत्यग्बोधोवतिष्ठते॥७७॥

देकरसःप्रत्यगात्मैवेत्यर्थः॥७५॥एवमखंडार्थबोधनेकिंस्यादित्यतआह॥इत्थमिति।त्वमर्थस्यप्रत्य
गात्मनोऽब्रह्मत्वंभ्रांतिसिद्धाऽब्रह्मरूपतातदर्थस्यचब्रह्मणश्चपारोक्ष्यंपरोक्षज्ञानविषयत्वंचनि
वर्तेत॥७६॥ततोपिकिमितिपृच्छति।यद्येवमिति।उत्तरमाह।शृण्विति॥७७॥ ब॥ ॥ ॥ १९

[illegible]केऽन्वयबलेन

ननुसमन्वयबलेनसम्यक्परोक्षानुभवसाधनमागमस्तस्यागमलक्षणमतोवाक्यस्यापरोक्षज्ञानजनकत्वं
कथमुच्यतइत्याशंक्यसिद्धांतपरिज्ञानशून्योयमितिमनसिनिधायोपहसति।एवंसतीति।एवंवदतः
सिद्धांतरहस्यंनैवजानंतीत्यर्थः॥७८॥ननुसिद्धांतस्तावत्तिष्ठतुवाक्यस्यपरोक्षज्ञानजनकत्वंत्वनुमा

एवंसतिमहावाक्यात्परोक्षज्ञानमीर्यते॥यैस्तेषांशास्त्रसिद्धांतविज्ञानंशोभतेतरां॥७८॥
आस्तांशास्त्रस्यसिद्धांतोयुक्त्यावाक्यात्परोक्षधीः॥स्वर्गादिवाक्यवन्नैवंदशमेव्यभिचारतः
७९

नसिद्धमितिशंकते।आस्तामिति।विमतंवाक्यंपरोक्षज्ञानजनकंभवितुमर्हतिवाक्यत्वात्स्व
र्गादिप्रतिपादकवाक्यवदित्यनुमानेनपरोक्षज्ञानजनकत्वंसिद्धमित्यर्थः॥अनैकांतिकोयंहेतुरिति
परिहरति।नैवमिति।दशमस्त्वमसीतिवाक्येवाक्यत्वेसत्यपरोक्षज्ञानकत्वस्योपलंभादितिभावः॥७९॥

किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगादपि न महावाक्यं परोक्षज्ञानजनकमिति संशीकार्यमित्याह ॥ स्वत इति ॥ ८० ॥ इष्टापत्तिरित्याशंक्याह ॥ वृद्धिमिति ॥ ८१ ॥ ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिकस्य तन्न युज्यत इति शंकते ॥ अंतःकरणेति ॥ ८२ ॥ ब्रह्मणो निरुपाधिकत्वमसिद्ध

स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः ॥ नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ॥ ८० ॥
वृद्धिमिष्टवतो मूलमपि नष्टमितीदृशं ॥ लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः ॥ ८१ ॥
अंतःकरणसंभिन्नबोधो जीवोऽपरोक्षतां ॥ अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः ॥ ८२ ॥

मिति परिहरति ॥ नैवमिति ॥ जीवस्य ब्रह्मरूपताज्ञानं यदस्ति तस्य सोपाधिकवस्तुविषयत्वात्तद्विषयस्य ब्रह्मणोऽपि सोपाधिकत्वं ज्ञानस्य सोपाधिकविषयत्वं च ज्ञेयस्य सोपाधिकत्वमंतरेण न घटत इति भावः ॥ २०

तदेव कुत इत्यत आह ॥ यावदिति ॥ ८३ ॥ ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्यमित्याशंक्याह ॥ अंतःकरणेति ॥ जीवभावब्रह्मभावयोरंतःकरणसाहित्यराहित्ये एवोपाधी इत्यर्थः ॥ ८४ ॥ नन्वंतःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु तन्नाभावरूपस्य तद्राहित्यस्य तदुचितमित्याशंक्य यावत्कार्यम

नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः ॥ यावद्विदेहकैवल्यमुपाधेरनिवारणात् ॥ ८३ ॥ अं
तःकरणसाहित्यराहित्याभ्यां विशिष्यते ॥ उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ॥ ८४ ॥

वस्थायि भेदे हेतोरुपाधिते युक्तोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि सत्त्वादुचितमेवोपाधित्वमित्यभिप्रायेण परिहरति ॥ यथेति ॥ विधिर्भावरूपोंऽतःकरणसंबंधो यथोपाधिः स्यात्तथा प्रतिषेधोऽभावरूपोंऽतःकरणवियोगो न किं उपाधिर्न स्यात् किं स्यादेवेत्यर्थः ॥ ८५ ॥ ॥ ब ॥

त॰ टी॰
२१

तथापि भावाभावरूपत्वलक्षणमवांतरवैलक्षण्यं दृश्यत एवेत्याशंक्य तस्य किंचित्करत्वेनानादरणीय
त्वमित्यभिप्रेत्य दृष्टांतमाह ॥ सुवर्णेति ॥ पुरुषप्रचारनिरोधकत्वांशेऽनुपयुक्तं सुवर्णत्वलोहत्वादिवै
लक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ॥ ८५ ॥ विधेरिव निषेधस्यापि ब्रह्मबोधोपायत्वेन ब्रह्मोपाधि

यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किं ॥ सुवर्णलोहभेदेन शृंखलात्वं न भिद्यते ॥ ८५ ॥

प्रवृत्तिः २

अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ वेदांतानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितं ॥
८६

त्वेदद्वयितुं विधिनिषेधयोरुभयोरपि ब्रह्मबोधोपायत्वमाचार्यैर्निरूपितमिति दर्शयति ॥
अतदिति ॥ तच्छब्देन ब्रह्मात्माभिधीयतेऽतच्छब्देन तदतिरिक्तमज्ञानादि व्यावृत्तिर्निरसनं तदेवरूप
मुपायस्तेन ॥ साक्षाद्विधिमुखेन च विधिर्विधानं ॥ साक्षाद्वाचकशब्दप्रयोगः सत्यं ज्ञानमनंतमित्येव २१

मादिरूपस्तेन च विधिमुखेन तद्द्वारेणापीत्यर्थः ॥ ८६ ॥ वेदांतानामुपनिषदां प्रवृत्तिः प्रवर्तनं प्रतिपा
दनं ब्रह्मणीति शेषः ॥ ८६ ॥ ननु वेदांतानामतद्व्यावृत्त्या ब्रह्मबोधकत्वांगीकारेऽहंशब्दार्थस्य कूटस्थ
स्यापि त्यागप्रसंगादहं ब्रह्मास्मीति सामानाधिकरण्येन ज्ञानं नोदेतुमर्हतीति शंकते ॥ अहमर्थेति

अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः ॥ नैवमंशस्य हि त्यागो भागलक्षणयोदितः ॥ ८७ ॥

॥ अहंशब्दार्थस्य सर्वस्य त्यक्तत्वान्नैवमिति परिहरति ॥ नैवमिति ॥ हि यस्मात्कारणाद्भागलक्षणया
जहदजहल्लक्षणयांशस्याहंशब्दार्थैकदेशस्य जडांशस्य त्याग ईरितो न कूटस्थस्यातोऽहं ब्रह्मास्मीति
ज्ञानमुपपद्यत इत्यर्थः ॥ ८७ ॥ ॥ ३ ॥

अंशत्यागेन बोधनप्रकारमभिनीय दर्शयति ॥ अंतःकरणेति ॥ ८८ ॥ ननु केवलस्य प्रत्यगात्मनः स्वप्रकाश
त्वाद्बुद्धिवृत्तिविषयत्वं न घटत इत्याशंक्याह ॥ स्वप्रकाशोपीति ॥ अन्यवत् घटादिवदित्यर्थः ॥ स्वप्रकाशोऽ

अंतःकरणसंत्यागादवशिष्टे चिदात्मनि ॥ अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते ॥ ८८ ॥
स्वप्रकाशोपि साक्ष्येव धीवृत्त्या व्याप्यतेऽन्यवत् ॥ फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ॥ ८९

हमित्येवं बुद्धिसंभवादिति भावः ॥ तर्ह्यपसिद्धांतापात इत्याशंक्य पूर्वाचार्यैरपि वृत्तिव्याप्यत्वस्यां
गीकृतत्वान्नायमपसिद्धांतापात इत्याह । फलव्याप्यत्वमिति फलं वृत्तिप्रतिबिंबितचिदाभासस्तद्व्या
प्यत्वमेवास्य प्रत्यगात्मनो निराकृतं स्वस्यैव स्फुरणत्वादिति भावः ॥ ८९ ॥ ब ॥ ॥ २२

आत्मनि फलव्याप्त्यभावं दर्शयितुमनात्मनो वृत्त्या फलेन च व्याप्यत्वं दर्शयति ॥ बुद्धीति । उभयव्याप्तेः
प्रयोजनमाह । तत्रेति । न च तयोर्बुद्धिचिदाभासयोर्मध्ये धिया बुद्धिवृत्त्या प्रमाणभूतया अज्ञानं नश्यति ज्ञा
नाज्ञानयोर्विरोधात् । आभासेन चिदाभासेन घटः स्फुरेत् जडत्वेन स्वतः स्फुरणाभावादिति भावः ॥ ९० ॥

बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं ॥ तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ ९० ॥
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते ॥ ९१ ॥

इदानीमात्मनि ततो वैलक्षण्यं दर्शयति ॥ ब्रह्मणीति । प्रत्यग्ब्रह्मणोरेकत्वस्याज्ञानावृतत्वात्तस्याज्ञा
नस्य निवृत्तये वाक्यजन्यया अहं ब्रह्मास्मीत्येवमाकारया धीवृत्त्या व्याप्तिरपेक्षिते स्वस्यैव स्फुरणरूपत्वा
त्स्फुरणाय चिदाभासो नापेक्षितेऽतो पुज्यमानोपि चिदाभासो नोपयुज्यत इत्यर्थः ॥ ९१ ॥ ॥ ब ॥ ॥

नुक्रमं घटदृष्टांतप्रदर्शनेन विशदयति। चक्षुरिति। अंधकारावृतघटादिदर्शने चक्षुर्दीपावुभावप्यपेक्ष्ये-
ते दीपदर्शने तु तथा न। किं त्वेकं चक्षुरेवापेक्ष्यते यथा। तथा ब्रह्मण्यज्ञाननाशायेति। पूर्वेण संबंधः॥९२॥
ननु बुद्धितद्वृत्तीनां चिदाभासवैशिष्ट्यस्वाभाव्यात् घटादिवद्ब्रह्मण्यपि फलव्याप्तिर्बलाद्भवेदित्याशं-

चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने तथा॥ न दीपदर्शने किंतु चक्षुरेकमपेक्ष्यते॥९२॥ ७॥
स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परं॥ न तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत्॥९३

क्याह। स्थितोपीति। यद्यपि घटाकारवृत्तिवद्ब्रह्मगोचरवृत्तावपि चिदाभासोऽस्ति तथापि नासौ ब्रह्म-
णो भेदेन भासते किंतु प्रचंडातपमध्यवर्तिप्रदीपप्रभावत् तेनैकीभूतइव भवत्यतो न स्फुरणलक्ष-
णातिशयजनको ब्रह्मणीत्यर्थः॥९३॥ ७॥ ॥

ननु ब्रह्मणि फलव्याप्तिर्नास्ति वृत्तिव्याप्तिस्तु विद्यत इत्युक्तं तत्र किं प्रमाणमित्याशंक्यागमः प्रमाण-
मित्याह। अप्रमेयमिति॥ निर्विकल्पमनंतं च हेतुदृष्टांतवर्जितं॥ अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते
बुध इत्यत्रास्मिन्मंत्रे श्रुत्याऽमृतबिंदूपनिषदाऽप्रमेयशब्देनेदं फलव्याप्तिराहित्यमुक्तं॥ मनसैवेद-

अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितं॥ मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता॥९४॥
आत्मानं चेद्विजानीयादयमस्मीति वाक्यतः॥ ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोऽभिधीयते ९५

माप्तव्यं नेह नानास्ति किंचनेति कठवल्ल्यां धीव्याप्यता श्रुता वृत्तिव्याप्यत्वं श्रुतमित्यर्थः॥९४॥
आत्मानं चेद्विजानीयादिति मंत्रेण परोक्षज्ञानशोकनिवृत्त्याख्यं जीवगतमवस्थाद्वयमभिधीयत इत्युक्तम
परोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे। अवस्थे जीवगे श्रुते आत्मानं चेदिति श्रुतिरित्यनेन श्लोकेन। तत्र कि-

यतांशेनापरोक्षज्ञानमुच्यते तस्याकांक्षायामाह ॥ आत्मानं चेदिति । ब्रह्मात्मव्यक्तिं सत्यादिलक्षणं ब्रह्मा
भिन्नप्रत्यगात्मस्वरूपमुल्लिखद्विषयीकुर्वन्यो बोधो जायते ब्रह्माहमस्मीति सोऽभिधीयतेऽनेन वाक्ये
नेत्यर्थः ॥॥५५॥ ननु तर्हि पूर्वोक्तरीत्या सकृद्वाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसकृदुपदेशा

अस्तु बोधोऽपरोक्षोऽत्र महावाक्यात्तथाप्यसौ ॥ न दृढः श्रवणादीनामाचार्यैः पुनरीरणात् ॥

दृढ

दित्याहौ विहितं श्रवणाद्यावर्त्तनमनुष्ठेयं स्यादित्याशंक्य ज्ञानदार्ढ्याय तदावर्त्तनानुष्ठानस्याचार्यै
रभिहितत्वादनुष्ठेयमेवेत्याह ॥ यत्त्विति ॥ अत्र ब्रह्मात्मनि विषये महावाक्यात्सकृच्छ्रुताद्विचारसहि
तादपरोक्षबोधोऽस्तु भवत्वेव तथापि नासौ दृढोऽतः श्रवणाद्यावर्त्तनीयं । श्रीमच्छंकराचार्यैः पुनर्वा
क्यार्थज्ञानोत्पत्त्यनंतरमपि श्रवणाद्यावर्त्तनाभिधानादित्यर्थः ॥ ज्ञानदार्ढ्यायेत्सतदर्थाह्वयमने ॥५६ २५

आचार्यैः केन वाक्येनाभिहितमित्याशंक्य तद्वाक्यं पठति ॥ अहमिति ॥ अहमिति ॥५७॥ ननु वाक्यप्रमाण
जनितस्य ज्ञानस्यादार्ढ्यं कुतस्तत्राशंक्याह ॥ बाढमिति ॥ हि यस्मात्कारणाच्छ्रुत्यनेकता । श्रुतीनां नानात्वमे
को हेतुरर्थस्याखंडैकरसस्याद्वितीयब्रह्मरूपस्यालौकिकत्वेनासंभावितत्वमपरो विपरीतभावना

अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ॥ शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ॥५७॥
बाढं संति ह्यदार्ढ्यस्य हेतवः श्रुत्यनेकता ॥ असंभाव्यत्वमर्थस्य विपरीता च भावना ॥५८॥ ॥

पुनः कर्तृत्वाद्यभिमानरूपस्तृतीय इत्येवंविधा अदार्ढ्यस्य हेतवो बाढं संति सर्वथा विद्यंतेऽतोऽपरोक्षज्ञा
नवदार्ढ्याय श्रवणादिकमावर्त्तनीयमिति भावः ॥५८॥ एवं त्रिविधानदार्ढ्यस्य हेतूनुपन्यस्य ॥ ब ॥ ॥

श्रुतिनानात्वप्रयुक्ताशङ्कानिवृत्तये श्रवणावृत्तिः कर्त्तव्येत्याह। शाखाभेदादिति। यथा शाखाभेदात्कर्म्म
भेदः ऋग्वेदेनैव होत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथमिति। यथा वा कामभेदात्कारीर्या वृष्टिकामो
यजेत शतकृष्णलमायुःकाम इत्यादिकर्म्मभेदः अत एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशंकायां

शाखाभेदात्कामभेदाच्छ्रुतं कर्म्मान्यथान्यथा॥ एवमत्रापि माशंकीत्यतः श्रवणमाचरेत्॥९९॥
वेदान्तानामशेषाणामादिमध्यावसानतः॥ ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत्॥१००॥

तन्निवारणाय श्रवणं पुनः पुनः कर्त्तव्यमित्यर्थः॥९९॥ किं तच्छ्रवणमित्याकांक्षायां तल्लक्षणमाह॥ वे
दान्तानामिति। सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मस्वरूपे प्रत्यगात्मन्येव ता
त्पर्यमिदं पर्यवसानमित्येवंरूपो निश्चयः श्रवणमित्यर्थः॥१००॥ ॥छ॥ ॥ २५

एवंविधं श्रवणं कुत्र निरूपितमित्यत आह॥ समन्वयेति। एतच्छ्रवणं समन्वयाध्याये स्फुटमुक्तं व्यासादिभिरि
तिशेषः। अर्थासंभावनानिवृत्तिहेतुर्मननं तु द्वितीयाध्याये निरूपितमित्याह। धीस्वास्थ्येति। प्रमेयगता
नुपपत्तिपरिहारद्वारा बुद्धिस्वास्थ्यकारिभिस्तर्कैर्युक्तिशब्दाभिधेयैरर्थस्य संभावनासंभावितत्वानुसंधानं

समन्वयाध्याय एतत्स्यात्सूत्रैर्धीस्वास्थ्यकारिभिः॥ तर्कैः संभावनार्थस्य द्वितीयाध्याय ईरितं॥१०१॥
बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात्॥ पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि॥१०२॥

मननं द्वितीयाध्याये निरूपितमित्यर्थः॥१०१॥ इदानीं विपरीतभावनां तन्निवृत्त्युपायं च दर्शयति। बहुज
न्मेति॥१०२॥ विपरीतभावनानिवर्त्तकं पदैकाग्र्यं न कुतो जायत इत्याशंक्याह। तत्त्वेति। एतदैकाग्र्यं ब्रह्मोप
देशात्प्रागेव सगुणब्रह्मोपासनाद्भवतीति न वेदित्यर्थः॥१०३॥ नन्वेतत्कुतोवगतमित्याशंक्योपासनावि॰

त॰दी॰ २६

चारस्यवेदांतशास्त्रेकृतत्वादित्याह॥ उपास्त्यइति॥ अकृतोपास्तिकस्यकुतस्तत्त्वनिश्चयइत्याह॥ प्रागिति
१०४॥ब्रह्माभ्यासस्यकीदृशइत्याकांक्षायामाह॥तच्चिंतनमिति॥१०५॥एतदेकपरत्वेविद्वादपितुश्रुतिमाह

विपरीताभावनेयमैकाग्र्यात्सानिवर्त्तते॥तत्त्वोपदेशात्प्रागेवभवत्येतदुपासनात्॥१०३॥उपा
स्त्योऽतएवात्रब्रह्मशास्त्रेविचिंतिता॥प्रागनभ्यासिनःपश्चाद्ब्रह्माभ्यासेनतद्भवेत्॥१०४॥त
च्चिंतनंतत्कथनमन्योन्यंतत्त्वबोधनं॥एतदेकपरत्वंचब्रह्माभ्यासंविदुर्बुधाः॥१०५॥तमेव
धीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः॥नानुध्यायाद्बहूञ्छब्दान्वाचोविग्लापनंहितत्॥१०६॥

तमेवेति॥धीरःब्रह्मचर्यादिसाधनसंपन्नःब्राह्मणःब्रह्मभवितुमिच्छुःमुमुक्षुस्तमेवप्रत्यक्परमात्मा
नमेवविज्ञायसंशयाद्यभावोयथाभवतितथाज्ञात्वाप्रज्ञांब्रह्मात्मैकत्वज्ञानसंततिरूपमैकाग्र्यंकुर्वीतसं २६

पादयेदनात्मगोचरान्बहूञ्छब्दान्नानुध्यायान्नस्मरेत्॥ध्यानेनाभिधानमप्युपलक्ष्यते॥नाभिदध्याच्चा
न्यथाशब्दध्यानेनवाग्विग्लापनानुपपत्तेःकुतइत्यतआह॥वाचइति॥हियस्मात्॥तदभिधानं॥अनेनस्म
रणमप्युपलक्ष्यते॥वाचइतिमनसोप्युपलक्षणं॥विग्लापनंविग्लापयतीतिविग्लापनंश्रमहेतुः॥अयमभि
प्रायः॥इतरशब्दानुसंधानेमनसःश्रमोभवति॥तदभिधानेतुवाचइति॥६॥एवमैकाग्र्यप्रतिपादिकांस्मृति

अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते॥तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं॥१०७॥

मभिप्रायसहितामप्याह॥अनन्याइति॥येजनाअनन्याअहंब्रह्मास्मीतिज्ञानेनमदभिन्नाःसंतस्तथैवमां
चिंतयंतःपर्युपासतेपरितःसर्वेष्वपिकालेषूपासतेमद्रूपाएववर्त्तंते॥नित्याभियुक्तानांसदामच्चित्तानांते
षामहंतादात्म्येनानुसंधीयमानोहंयोगक्षेममलब्धलाभलब्धपरिरक्षणरूपौयोगक्षेमौवहामिसंपाद
यामीत्यर्थः॥१०७

उदाहृतयोः श्रुतिस्मृत्योस्तात्पर्यमाह ॥ इतीति ॥ एते श्रुती विपरीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्र्यं प्रतिपादयत इत्यर्थः ॥१०८॥ ननु देहाद्यात्मत्वबुद्धेर्जगत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वमित्याशंक्य तल्लक्षणयोगादिति दर्शयितुं तस्या लक्षणमाह ॥ यद्यथेति ॥ यद्वस्तु शुक्त्यादि यथा येन शुक्त्यादिरू-

इति श्रुतिस्मृती नित्यमात्मन्येकाग्रतां धियः ॥ विधत्तो विपरीताया भावनायाः क्षयाय हि ॥८॥
यद्यथा वर्तते तस्य तत्त्वं हित्वाऽन्यथात्वधीः ॥ विपरीता भावना स्यात्पित्रादावरिधीर्यथा ॥९॥

पेण वर्तते तस्य तत्त्वं शुक्त्यादिरूपत्वं परित्यज्याऽन्यथात्वस्य रजतादिरूपत्वस्य धीर्ज्ञानं विपरीतभावना स्यादतस्मिंस्तद्बुद्धिरिति यावत् ॥ तामुदाहरति ॥ पित्रादाविति ॥९॥ ब ॥ ॥

उक्तलक्षणं प्रकृते योजयति आत्मेति अयमात्मा वस्तुतो देहादिभ्यो भिन्नः इदं जगच्च मिथ्या एवं सत्यपि तयोरात्मजगतोर्यथाक्रमं देहादिरूपत्वबुद्धिः सत्यत्वबुद्धिश्च यासा विपरीतभावनेत्यर्थः ॥१०॥ एवमि-काप्यात्मा निवर्तत इति सामान्येनोक्तमर्थं विशेषाकारेणाह ॥ तत्त्वभावनयेति ॥ सा देहाद्यात्मत्वजग-

आत्मा देहादिभिन्नोऽयं मिथ्या चेदं जगत्तयोः ॥ देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना ॥१०॥
तत्त्वभावनया नश्येत्साऽतो देहातिरिक्ततां ॥ आत्मनो भावयेत्तद्वन्मिथ्यात्वं जगतोऽनिशं ॥
११

त्सत्यत्वधीरूपा विपरीता भावना तत्त्वभावनया आत्मनो देहातिरिक्तत्वस्य जगतो मिथ्यात्वस्य च भावनया निरंतरध्यानेन नश्येदत आत्मनो देहाद्यतिरिक्तत्वं देहादेर्जगतो मिथ्यात्वं च सदा भावयेदित्युक्तं ॥११॥

तत्र जपादाविव नियमापेक्षास्ति वा न वेति पृच्छति। किमिति। आत्मभेदधीः आत्मनो देहादिभ्यो विभिन्नत्वज्ञानं ज
गतो मिथ्यात्वानुसंधानं च मम चेज्जपदेवताध्यानादिवत्किं नियमेनानुष्ठातव्यमुत लौकिकव्यवहारवन्निय
ममन्तरेणापि कर्तुं शक्यत इति॥२२॥ दृष्टफलकत्वात्तत्र नियमः कश्चिदस्तीत्याह॥ अन्यथेति।ति॥ अ

किं मे जपवन्न्यस्तिध्यानवच्चात्मभेदधीः॥ जगन्मिथ्यात्वधीश्चाद्य व्यावर्त्यास्यादुताऽन्यथा॥२२॥
अन्यथेति विजानीहि दृष्टार्थत्वेन भुक्तिवत्॥ बुभुक्षुर्जपवद्भुंक्ते न कश्चिन्नियतः क्वचित्॥२३॥

न्यथा नियमं विनेत्यर्थः॥ तत्र हेतुमाह। दृष्टार्थत्वेनेति। तत्र दृष्टान्तमाह। भुक्तिवदिति॥ दृष्टार्थेऽपि भोजने नि
यमाः श्रुतिस्मृत्योरुपलभ्यन्त इत्याशंक्याह। बुभुक्षुरिति। क्षुदुपशमनाय भोक्तुमिच्छुर्भोजनं कुर्वाणो जप
वन्नियमेन भुंक्ते ऽपि तु यथा क्षुद्बाधोपशान्तिः स्यात्तथा भोजनं करोतीत्यर्थः॥ ॥२३॥ ॥ छ॥ ॥ २८

एतदेव प्रपंचयति। अश्नातीति। अश्नाति वान्नमति कदाचिद्भुंक्ते न वाश्नाति तस्मिन्नसति क्षुद्बाधाविस्मारक
द्यूतादिचेष्टयाऽनश्नन्नेव कालं नयति। अन्यथा वा तिष्ठन् शयानो वा स्वेच्छया भुंक्ते एवं येन केन प्रकारेण ता
त्कालिकीं क्षुद्बाधामपनेतुमिच्छति। अयमभिसंधिः। क्षुद्बाधानिवृत्तिलक्षणदृष्टफलाय भोजनमेव का

अश्नाति वा न वाऽश्नाति भुंक्ते वा स्वेच्छयाऽन्यथा॥ येन केन प्रकारेण क्षुधामपनिनीषति॥२४॥
नियमेन जपं कुर्यादकृतौ प्रत्यवायतः॥ अन्यथाकरणेऽनर्थः स्वरवर्णविपर्ययात्॥२५॥ छ॥

यं नियमास्तु परलोकहेतव इति॥२४॥ जपादौ भोजनाद्वैलक्षण्यं दर्शयति। नियमेनेति। तत्र हेतुमाह। अ
कृतौ प्रत्यवायत इति॥ भवत्वेवमकरणे प्रत्यवायोऽन्यथाकरणे तु स नास्तीत्याशंक्याह। अन्यथेति॥

त॰टी॰
२८

मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वर
तोऽपराधादित्युक्तत्वादिति भावः॥११५॥ ननु क्षुधाया दृष्टबाधाहेतुत्वात्तन्निवृत्तयेऽनियमेनापि भोक्तव्य
मेव विपरीतभावनायास्तु तथात्वाभावात्तन्निवर्तकं ध्यानमदृष्टफलाय नियमेनानुष्ठेयमित्याशंक्या

क्षुधेव दृष्टबाधाकृद्विपरीता च भावना॥ जेयैषा केनाप्युपायेन नास्त्यत्रानुष्ठितेः क्रमः
११६॥ उपायः पूर्वमेवोक्तस्तच्चिंताकथनादिकः॥ एतदेकपरत्वेऽपि निर्बंधो ध्यानवन्न हि॥११७॥

ह। क्षुधेवेति॥ विपरीतभावनाया दुःखहेतुत्वस्यानुभवसिद्धत्वादिति भावः॥११६॥ तर्हि स उपायः प्रदर्श
नीय इत्याशंक्य पूर्वमेव प्रदर्शित इत्याह। उपाय इति॥११७॥ ननु जपवत्स्मरणवत्त्वादिनियमो मास्त्वा २८

नवदेतदेकपरत्वलक्षणैकाग्रतानिर्बंधोऽस्त्वित्याशंक्याह। एतदिति॥११७॥ ननु ध्यानस्य ध्येयचिंतामात्रा
त्मकत्वात्तत्र को निर्बंध इत्याशंक्य ध्याने निर्बंधं दर्शयितुं ध्यानस्वरूपं तावदाह। मूर्तीति॥ धियो बुद्धेः सं
बंधिनां मूर्तिप्रत्ययानां देवतादिमूर्तिगोचराणां प्रत्ययानां यत्सांतत्यमविच्छिन्नतया वर्तमानत्वं तदन्यानंत

मूर्तिप्रत्ययसांतत्यमन्यानंतरितं धियः॥ ध्यानं तत्राति निर्बंधो मनसश्चंचलात्मनः॥११८॥
चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं॥

रितमन्येन विजातीयप्रत्ययेनाव्यवहितं सद्ध्यानमित्यु
च्यते। एवं ध्यानस्वरूपं निरूप्य तत्र निर्बंधं दर्शयति। तत्रेति। सदा पर्यटनशीलस्य करितुरगादेरेकत्र
स्तंभादौ बंधने यथोपरोधस्तद्वदिति भावः॥११८॥ मनसश्चांचल्यादौ गीतावाक्यं प्रमाणयति॥ चंचलं

त.ही.
३०

ह्नीति॥ प्रमाथीत्यत्र मनः शीघ्रं पुरुषस्य व्याकुलत्वे कारणं बलवत्समर्थमनिग्राह्यमित्यर्थः॥ दृढं तन्तुसन्ततिवा
विषये लग्नं तन्नत उद्धर्तुमशक्यमित्यर्थः॥ अतस्तस्य मनसो निग्रहो वायोर्निग्रह इव सुदुष्करः॥१९॥ मनसो

तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥१९॥ अप्यब्धिपानान्महतः सुमेरून्मूलनादपि॥ अ
पि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः॥२०॥ कथनादौ न निर्बंधः श्रेयस्त्वाद्वदेहवत्॥७॥

दुर्निग्रहत्वे वाशिष्ठवाक्यमपि प्रमाणयति॥ अप्यब्धिपानादिति॥२०॥ प्रकृते ततो वैषम्यं दर्शयति॥ कथना
दाविति। श्रेयस्त्वाद्वदेहस्य यथा निर्बंधो न तथा कथनादावित्यर्थः॥ आदिशब्देन तच्चिंतनादिकं गृह्य
ते॥७॥ ३०

न केवलं निर्बंधाभावः प्रत्युतयोर्धीविनोद इत्याह। किंत्विति। इतिहासः पूर्वेषां कथा आख्यायिका लौकिकक-
थानुकूलयुक्तिदृष्टांतप्रदर्शनादीनां तेऽनंता असंख्याताः अनंताश्च ते इतिहासाद्याश्चेत्यनेनततेतिहा-
साद्यास्तैर्धियो बुद्धेर्विनोदः क्रीडाविशेषो भवति। तत्र दृष्टांतः॥ नाट्यवदिति। नटनक्रियानिरीक्षणमिवे-

किंत्वनंतेतिहासाद्यैर्विनोदो नाट्यवद्धियः॥२१॥ चिदेवात्मा जगन्मिथ्येत्यत्र पर्यवसानतः
निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत्॥२२॥ कृषिवाणिज्यसेवादौ काव्यतर्कादिकेषु च॥ विक्षि

त्यर्थः॥२१॥ ननु कथादिभिरप्येतदेकपरत्वविघातः स्यादित्याशंक्याह। चिदेवेति। इतिहासादिना आत्मा चिन्मात्र
रूपो न देहादिरूपो जगच्च मिथ्येत्येतस्मिन्नर्थे पर्यवसानान्न तैरेतदेकपरत्वशब्दाभिधेयस्य निदिध्यासनस्य
विक्षेप इत्यर्थः॥२२॥ नन्वितिहासादीनामंगीकारे कृष्यादेरपि प्रसक्तिः स्यादित्याशंक्याह। कृषीति॥२३॥

त॰ दी॰ ३१

दृष्ट्यादीनां तत्त्वानुसंधानविघातित्वेन साम्यत्वे भोजनादेरपि तथात्वात्तद्वदिमाम्यमेवेत्याशंक्याह ॥ अनु-
संदधतैवेति ॥ कुतस्तत्राह ॥ असंगेति ॥ विक्षेपाभावोऽपि कुतस्तत्राह ॥ आशु पुनः स्मृतेरिति ॥२४॥

प्यते प्रवृत्ताधीस्तैस्तत्त्वस्मृत्यसंभवात् ॥२३॥ अनुसंदधतैवात्र भोजनादौ प्रवर्तितुं ॥ श-
क्यतेऽसंगविक्षेपाभावादाशु पुनः स्मृतेः ॥२४॥ तत्त्वविस्मृतिमात्रान्नानर्थः किंतु विपर्य-
यात् ॥ विपर्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित् ॥२५॥ ब ॥

ननु तदानीं विक्षेपाभावेऽपि तत्त्वविस्मृतिसद्भावात्पुरुषार्थहानिः स्यादित्याशंक्याह ॥ तत्त्वेति ॥ कुतस्तत्त्व-
नर्थ इत्यत आह ॥ किंत्विति ॥ विस्मरणे सति विपर्ययोऽपि स्यादित्याशंक्याह ॥ विपर्येतुमिति ॥२५॥ ३१

ननु भोजनादिषु प्रवृत्तस्येव तर्काद्यभ्यासप्रवृत्तस्यापि तत्त्वस्मरणं किं न स्यादित्याशंक्याह ॥ तत्त्वस्मृतेरि-
ति ॥ न केवलं तत्त्वानुसंधानावसराभाव एव किंतु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्यासविरोधित्वात्तदा-
नीं स्मरणमपि तत्त्वं बलादुपेक्षत इत्याह ॥ प्रत्युतेति ॥२६॥ तत्त्वानुसंधानविरोधिवाग्व्यवहारस्य त्या-

तत्त्वस्मृतेरवसरो नास्त्यन्याभ्यासशालिनः ॥ प्रत्युताभ्यासघातित्वाद्बलात्तत्त्वमुपेक्ष्यते ॥
॥२६॥ तमेवैकं विजानीथ ह्यन्या वाचो विमुंचथ ॥ इति श्रुतं तथान्यच्च वाचो विग्लापनं त्विति ॥२७॥

ज्यत्वे प्रमाणत्वेन तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथाऽमृतस्यैष सेतुरिति श्रुतिवाक्यम-
र्थतः ॥ पठति ॥ तमेवैकमिति ॥ नानुध्यायाद्बहूंछब्दान्वाचो विग्लापनं हि तदित्येतदपि वाक्यं श्रूयत
इत्याह ॥ तथान्यच्चेति ॥२७॥

त॰ दी॰
३२

ननु तत्त्वानुसंधानातिरिक्तमाहारादि यथा न त्यजत्येवमितरशास्त्राभ्यासोपि क्रियतामित्या
ग्रहं कुर्वाणं प्रत्याह॥ आहारादीति॥२८॥ ननु तर्हि जनकादीनां तत्त्वविदां कथं राज्यपरिपालना
दौ प्रवृत्तिरिति शंकते जनकादेरिति। दृढापरोक्षज्ञानित्वात्तेषां सा न बाधिकेत्यभिप्रायेण परिहरति॥ दृढे

आहारादि त्यजन्नैव जीवेच्छास्त्रांतरं त्यजेत्॥ किं न जीवसि येनैवं करोष्यत्र दुराग्रहं॥२८॥ ज
नकादेः कथं राज्यमिति चेद्दृढबोधतः॥ तथा तवापि चेत्तर्कं पठ यद्वा कृषिं कुरु॥२९॥ मिथ्या
त्ववासनादार्ढ्ये प्रारब्धक्षयकांक्षया॥ अक्लिश्यंतः प्रवर्तंते स्वस्वकर्मानुसारतः॥३०॥

तर्हि ममापि दृढबोधोस्तीति वदंतं प्रत्याह। तथेति॥२९॥ ननु तत्त्वविदः संसारासारतां जानंतः कुत
स्तत्र प्रवर्तिष्यंत इत्याशंक्य प्रारब्धस्यावश्यंभाविफलत्वाद्भोगेन तत्क्षयाय प्रवृत्तिरित्याह। मिथ्यात्वेति ३२
॥३०॥

तर्ह्यनाचारेपि प्रवृत्तिः स्यादित्याशंक्याह॥ अतिप्रसंग इति॥ प्रारब्धवशादेवातिप्रसंगोपि स्यादित्या-
शंक्यांगीकरोति॥ अस्तु वेति॥३१॥ ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्मणोवश्यंभोक्तव्यत्वे तथा समाने तयोः

अतिप्रसंगो मा शंक्यः स्वकर्मवशवर्तिनां॥ अस्तु वा केन शक्येत कर्म वारयितुं वद॥३१॥ ज्ञा
निनोऽज्ञानिनश्चात्र समे प्रारब्धकर्मणि॥ न क्लेशो ज्ञानिनो धैर्यान्मूढः क्लिश्यत्यधैर्यतः॥३२॥
मार्गे गंत्रोर्द्वयोः श्रांतौ समायामप्यदूरतां॥ जानन्धैर्याद्द्रुतं गच्छेदन्यस्तिष्ठति दीनधीः॥३३॥ सा
क्षात्कृतात्मधीः सम्यगविपर्ययबाधितः॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्॥३४॥ ॥

कृतौ वैलक्षण्यसिद्धिरित्याशंक्याह। ज्ञानिन इति॥३२॥ तत्र दृष्टांतमाह॥ मार्ग इति॥ इत्युपपादितमा-
त्मानं चेदिति मंत्रस्य पूर्वार्धार्थमनुवदन्तत्त्वदर्शनफलं परमुत्तरार्द्धमवतारयति। साक्षादिति॥ सम्य

व.टी. ३३

कृसाक्षात्कृतात्मधीः साक्षात्कृत आत्मा यया सा साक्षात्कृतात्मा तादृशी धीर्यस्य स साक्षात्कृतात्मधीः अ
विपर्ययबाधितः विपर्य्ययेण देहाद्यात्मत्वबुद्ध्या बाधितो न भवतीत्यविपर्ययबाधितः उभयं हेतुगर्भवि
शेषणं॥३४॥ अस्य मंत्रार्द्धस्य तात्पर्यमाह॥ जगदिति॥ काम्यश्च कामुकश्च काम्याकामुकौ ताबाक्षिप्तौ॥

जगन्मिथ्यात्वधीभावादाक्षिप्तौ काम्यकामुकौ॥ तयोरभावे संतापः शाम्येन्निःस्नेहदीपवत्॥३५॥

तन्निराकरणे कारणमाह॥ जगन्मिथ्यात्वेति॥ ततः किमित्यत आह॥ तयोरिति॥ तयोः काम्यकामुकयो
रभावे संतापः कामनानिमित्तकः कारणाभावान्निःस्नेहदीपवच्छाम्येदित्यर्थः॥३५॥ ७॥ ॥ ३३

काम्याभावात्कामनाभावः क्व दृष्टस्तत्राह॥ गंधर्वेति॥ मायाविनिर्मिते पत्तने स्थितं वस्तु किंचिदपि इद
मैंद्रजालिकनिर्मितमिति जानन्न कामयते॥ न केवलं कामनाभावः अत्यन्तरमन्तरमिति हसन् जिहा
सति परित्यक्तुमिच्छति॥३६॥ श्लोकांतिके योजयति॥ आपातेति॥ एवमापातरमणीयेष्वनीतिमात्तरम्ये

गंधर्वपत्तने किंचिन्नैंद्रजालिकनिर्मिते॥ जानन्कामयते किंतु जिहासति हसन्निदं॥३६॥ आ
पातरमणीयेषु भोगेष्वेव विचारवान्॥ नानुरज्यति किं त्वेतान्दोषदृष्ट्या जिहासति॥३७॥ ॥

भोगेषु भुज्यंत इति भोगा विषयाः स्रक्चंदनादयस्तेषु एवं विचारवान् आपातरमणीयत्वानुसंधा
नवान्नानुरज्यति नासक्तिं करोति॥ किंतु दोषदर्शनेनैतान्परित्यक्तुमिच्छतु॥३७॥ केते विषयदोषास्त

तत्राह॥ अर्थानामिति॥ ३८॥ एवं विषयाणां दुःखहेतुत्वेपि दर्शिताशोभनत्वं च कश्चिद्दर्शयति॥ मांसेति॥
स्नायवः शिराः अस्थीनि ग्रन्थिसहितानि ग्रथ्यो मांसनिचयरूपानि ते वस्त्ताद्यः एतैः सहितमांसपांचा

अर्थानामर्जने क्लेशस्तथैव परिपालने॥ नाशे दुःखं व्यये दुःखं धिगर्थान्क्लेशकारिणः॥ ३८॥
मांसपांचालिकायास्तु यंत्रलोलेंगपंजरे॥ स्नाय्वस्थिग्रंथिशालिन्याः स्त्रियाः किमिव शोभनं॥
॥ ३९॥ एवमादिषु शास्त्रेषु दोषाः सम्यक्प्रपंचिताः॥ विमृशन्ननिशं तानि कथं दुःखेषु मज्जति॥ ४०॥

लिकायाः पुत्तलिकायाः योषितो यंत्रलोले यंत्रवच्चलनशीलेंगपंजरे अंगान्येव पंजरं तस्मिन् छरीरे
किं शोभनमिव न किमपीत्यर्थः॥ ३९॥ एवमादिषु इत्यादिशब्देन त्वङ्मांसरक्ताष्वस्नायुप्रभृत्तिविलोचने ३४

समालोकय रम्यं चेत्किं सुधापरिपुष्यसीत्येवमादयो गृह्यन्ते॥ ४०॥ विषयदोषदर्शने सति भोगेच्छाभावे तु क्लि
सहितं दृष्टान्तमाह॥ क्षुधयेति॥ स्वयममूढो विवेकी मृष्टान्नभोजनेन ध्वस्ता विनष्टा तृट् तृष्णा आकांक्षा
यस्य सतथोक्तः इदं विषमित्येवं जानंस्तद्विषं न जिघत्सति नात्तुमिच्छतीत्यर्थः॥ ४१॥ ननु प्रारब्धकर्म

क्षुधया पीड्यमानोपि न विषं ह्यत्तुमिच्छति॥ मृष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति॥ ४१॥
ग प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छा भवेद्यदि॥ क्लिश्यन्नेव तदाप्येष भुंक्ते विष्टिगृहीतवत्॥ ४२॥ भुंजाना
नस्तां अपि बुधाः श्रद्धावंतः कुटुंबिनः॥ नाद्यापि कर्म नश्छिन्नमिति क्लिश्यंति संततं॥ ४३॥ ॐ॥ ॥

णः प्रबलत्वाज्ज्ञानिनोपीच्छा भवेदित्याशंक्य सत्यामपीच्छायां प्रीतिपुरःसरं न भुंक्त इत्याह॥ प्रारब्धेति॥ ४२॥
कपमेतदवगम्यत इत्याशंक्य लोकदर्शनादित्याह॥ भुंजाना नाइति॥ ४३॥ ननु तत्वविदां संसारनिमित्त

त॰ दी॰ कस्तापोऽनुपपन्नः ज्ञानवैयर्थ्यापातादित्याशंक्याह॥ नायमिति॥ अयं क्लेशः नाद्यापि कर्मनष्ठित्वमित्येवमनु
३५ तापात्मकः संसारतापो न भवति किंत्वत्र संसारे विरक्तता आसक्तिरहिता॥ तापकत्वाभावे युक्तिमाह॥ ॥
भ्रांतीति॥ हि यस्मात्कारणात्सांसारिकस्तापो भ्रांतिज्ञाननिदानः भ्रांतिज्ञानकारणकः स्मृतः पूर्वाचा

नायं क्लेशोऽत्र संसारतापः किंतु विरक्तता॥ भ्रांतिज्ञाननिदानो हि तापः सांसारिकः स्मृतः॥४४॥
विवेकेन परिक्लिश्यन्नल्पभोगेन तृप्यति॥ अन्यथानंतभोगेऽपि नैव तृप्यति कर्हिचित्॥४५॥ ॥

र्यैरयं तु विवेकज्ञानमूलत्वान्न तथाविध इत्यर्थः॥४४॥ अयं क्लेशो विवेकमूलोऽविवेकमूलो वेति कुतो
ऽवगम्यत इत्याशंक्य कामनिवर्त्तकत्वाद्विवेकमूल इत्याह॥ विवेकेनेति॥४५॥ विवेकिन इवाविवेकिनोऽपि
भोगे नैव तृप्तिः स्यादतो विवेको प्रयोजक इत्याशंक्य भोगस्य तृप्तिहेतुत्वाभावप्रतिपादिकां श्रुतिं पठति॥ ३५

न जात्विति॥४६॥ विवेकमूलस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमित्याह॥ परिज्ञायेति॥ अयं भोग एताव
नेवं प्रयाससाध्य इत्येवमनुभवपूर्वकश्चेदयं बुद्धिहेतुर्दृश्यत इत्यर्थः॥ ननु तृष्णाहेतोर्भोगस्य विवेकसा

न जातु कामः कामानामुपभोगेन शाम्यति॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥४६॥ परिज्ञा
योपभुक्तो हि भोगो भवति तुष्टये॥ विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरताम्॥४७॥ ॥

हचर्यमात्रेण कथं तुष्टिकरत्वमित्याशंक्य सहचारिविशेषवशाद्विपरीतकार्यकरत्वं लोके दृष्टमित्याह॥
विज्ञायेति॥ अयं चोर इति ज्ञात्वानेन सह वर्त्तमानस्य पुरुषस्य न चोरो भवति किंतु मित्रतामेतीत्यर्थः॥

तृ॰दी॰
३६

ननुकामनास्वरसत्वान्मनसःकथंस्वल्पभोगेनतृप्तिःस्यादित्याशंक्यनिदिध्यासनेननिगृहीतस्यातथात्वा
द्भवत्येवतृप्तिरित्याह॥मनसइति॥निगृहीतस्ययोगाभ्यासेनवशीकृतस्यमनसः॥अल्पकोपिस्वल्पोपि

मनसोनिगृहीतस्यलीलाभोगोल्पकोपियः॥तमेवालब्धविस्तारंक्लिष्टत्वाद्बहुमन्यते॥४८॥
बद्धमुक्तोमहीपालोग्राममात्रेणतुष्यति॥परैर्नबद्धोनाक्रांतोनराष्ट्रंबहुमन्यते॥४९॥ ॥

लीलाभोगोलीलानुभवोयोस्तितमलब्धविस्तारमप्राप्तव्याप्त्यंतमेवभोगंक्लिष्टत्वाद्दोषयुक्तत्वाद्बहु
मन्यतेऽधिकत्वेनजानातीत्यर्थः॥४८॥निगृहीतस्यमनसःस्वल्पेनापिभोगेनतृप्तिर्भवतीत्यत्रदृष्टांत ३६
माह॥बद्धमुक्तइति॥४९॥

ननुप्रारब्धकर्मप्राबल्याद्भोगेष्विच्छाभवेद्यदीत्यत्रकर्मवशादिच्छाभवेदित्युक्तेनतदुपपन्नमिच्छाविघातिनि
विवेकज्ञानेसति।तदुत्पत्त्यसंभवादितिशंकते।विवेकइति॥५०॥दोषदर्शिनस्तस्यापीच्छाजन्मसंभविष्यतिप्रा

विवेकेजाग्रतिसतिदोषदर्शनलक्षणे॥कथमारब्धकर्मापिभोगेच्छांजनयिष्यति॥५०॥नैषदो
षोयतोनेकविधंप्रारब्धमीक्ष्यते॥इच्छानिच्छापरेच्छाचप्रारब्धंत्रिविधंस्मृतं॥५१॥अपथ्यसेविनः
चौराराजदाररताअपि॥जानंतएवस्वानर्थमिच्छंत्यारब्धकर्मतः॥५२॥

रब्धस्यनानाप्रकारत्वा
दितिपरिहरति॥नैषदोषइति॥नानाप्रकारत्वमेवदर्शयति॥इच्छेति॥इच्छाजनकमनिच्छयाभोगप्रदं
परेच्छयाभोगप्रदंचेतित्रिविधमित्यर्थः॥५१॥इच्छाप्रारब्धंदर्शयति॥अपथ्यसेविनइति॥५२॥ ७॥

अपथ्यसेवाद्यीछायाः प्रारब्धफलत्वं कुतोऽवगम्यत इत्याशंकापरिहार्यत्वादित्यभिप्रेत्याह ॥ न चात्रैतद्वि
ति । अत्रास्मिंल्लोके । अपथ्याद्यीछंतीत्येतत्कुत इत्यत आह ॥ यत इति ॥ ५३ ॥ गीतावाक्यं पठति । सदृशमि
ति । विवेकज्ञानवानपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशमनुरूपं चेष्टते प्रकृतिर्नाम पूर्वकृतध

न चात्रैतद्वारयितुमीश्वरेणापि शक्यते ॥ यत ईश्वर एवाह गीतायामर्जुनं प्रति ॥ ५३ ॥ स
दृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ५४ ॥

र्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः किमुत मूर्खस्तस्मात्प्रकृतिं यान्ति भूतानि निग्रहः प्रवृत्ति
निवृत्त्योर्निरोधो मयाऽन्येन वा कृतः किं करिष्यति न किमपीत्यर्थः ॥ ५४ ॥ ब ॥ ३७

तीव्रप्रारब्धस्यापरिहार्यत्वे वचनांतरसंमतिमाह ॥ अवश्यमिति ॥ अवश्यंभाविभावानां दुःखानाम
नित्यर्थः ॥ ५५ ॥ प्रारब्धस्यापरिहार्यत्वे तत्परिहारासमर्थस्येश्वरस्यानीश्वरत्वप्रसंग इत्याशंक्याह

अवश्यंभाविभावानां प्रतिकारो भवेद्यदि ॥ तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः ॥ ५५ ॥ न चेश्व
रत्वमीशस्य हीयते तावता यतः ॥ अवश्यंभाविताप्येषामीश्वरेणैव निर्मिता ॥ ५६ ॥ प्रश्नोत्तरा
भ्यामेवैतद्गम्यतेऽर्जुनकृष्णयोः ॥ अनिच्छापूर्वकं चास्ति प्रारब्धमिति तच्छृणु ॥ ५७ ॥

न चेति । कुत इत्यत आह । यत इति । यतः कारणादेषां दुःखादीनामवश्यंभाविताऽपीश्वरेणैव निर्मिताऽतो
नानीश्वरत्वप्रसंग इत्यर्थः ॥ ५६ ॥ एवं सप्रपंचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं वक्तुमारभते ॥ प्रश्नोत्त

र·टी· राभ्यामिति। अनिच्छापूर्वकं च प्रारब्धमस्तीति एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेव स्पष्टं ते ज्ञायत इति योजना
३८ । तदभिधानाय शिष्यमभिमुखी करोति। तद्व्यक्तिरिति।५७॥ तत्रार्जुनस्य प्रश्नं तावद्दर्शयति॥ अथ केनेति। हे
वार्ष्णेय वृष्णिसंबंधिन् अयं पुरुषः केन प्रयुक्तः प्रेरितः अनिच्छन्नपि इच्छामकुर्वन्नपि राज्ञा बलान्नियोजित इव

अथ केन प्रयुक्तोयं पापं चरति पूरुषः॥ अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥५८॥ काम
एष क्रोध एष रजोगुणसमुद्भवः॥ महाशनो महापाप्मा विद्ध्येनमिह वैरिणं॥५९॥ ३॥

पापं चरति आचरति॥५८॥ कृष्णस्योत्तरमाह। काम एष इति। एष पुरुषप्रवर्तकः रजोगुणसमुद्भवः त्रि
र्यस्य सः रजोगुणसमुद्भवः कामः एष प्रसिद्धोयं कामः कदाचित्क्रोधरूपेणापि परिणमते तेन ततः क्रोधः समु ३८

नः कीदृशः महाशनः महदशनं विषयजातं यस्य स महाशनः महापाप्मा महतः पापस्य हेतुत्वादुपचारान्महापा
प्मत्वमस्य अतएव संसारेण कामं क्रोधरूपं वैरिणं विद्धि। अयमभिप्रायः प्रारब्धवशादुद्रिक्तरजोगुणकार्य
योः कामक्रोधयोरन्यतरस्यैव पुरुषप्रवर्तकत्वं न प्रवर्तिरीच्छाया इति॥५९॥ नन्वत्र कामक्रोधयोरेव पुरुष

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत्॥ ६०॥

प्रवर्तकत्वमुपलभ्यते। नानिच्छाप्रारब्धस्येत्याशंक्य तस्यैव प्रवर्तकत्वप्रतिपादकं तद्वाक्यमुपगति। स्वभा
वजेनेति॥ हे कौंतेय स्वेनैवानुष्ठितेनातएव स्वकीयेन प्रारब्धेन कर्मणा निबद्धः सन् यत्कर्तुं नेच्छसि तदपि
मोहादविवेकतः अवशः परवशः करिष्यसीत्यतोऽनिच्छाप्रारब्धमस्तीत्यनुपपन्नमिति भावः॥६०
इदानीं परेच्छाप्रारब्धमप्यस्तीत्याह॥ नानिच्छंत इति। अनिच्छंतोपि न भवंति इच्छंतोपि न भवंति किंतु पर

त॰दी॰
३८

द्धाब्धिप्रसंयुताःसंतस्तत्त्ववित्मृषैवसुखदुःखेअनुभवंतिअतएवतत्सुखादीहभोगहेतुभूतंपरेच्छा
पूर्वकंप्रारब्धंभवतिइत्यर्थः॥अतएवदोषदर्शनेसत्यपिप्रारब्धस्यापरिहार्यत्वात्स्वेच्छाजनक
त्वेननिवारयितुंशक्नोतीतिभावः॥६१॥ननुतत्त्वविदोपीच्छांगीकारेकिमिच्छन्नितिश्रुतिविरोधइति

नापिच्छंतोनचेच्छंतःपरप्रारब्धसंयुताः॥सुखदुःखेभजंत्येतत्परेच्छापूर्वकर्मदि॥६१॥
कथंतर्हिकिमिच्छन्नित्येवमिच्छानिषिध्यते॥नेच्छानिषेधःकिंत्विच्छाबाधोभर्जितबीजवत्॥
६२॥

शंकते॥कथमिति॥किमिच्छन्नित्यनेनवाक्येनकथमिच्छाभावोवर्णितइत्यर्थः॥नानेनेच्छाभावोऽभिधीय
तेकिंतुसत्याअपितस्याःसमर्थप्रवृत्तिजनकत्वेनास्तीतिबोध्यतइतिपरिहरतिनेच्छेति॥स्वरूपेण
सत्याअपितस्याःसामर्थ्यराहित्येदृष्टांतमाह॥भर्जितेति॥६२॥संक्षेपेणोक्तमर्थंप्रपंचयति॥भर्जि ३८

तानीति॥यथाभर्जितानिबीजानिस्वयंस्वरूपेणविद्यमानान्यपिनांकुरादिकार्यकराणिभवंति॥तथा
विद्वदिच्छास्वयंविद्यमानापीष्यमाणपदार्थस्यासत्त्वज्ञानेनबाधितत्वान्नव्यसनादिकार्यक्षमेत्य
र्थः॥६३॥ननुतर्हिविदुषइच्छेवनांगीकर्तव्याफलाभावादित्याशंक्यफलाभावोऽसिद्धोभोगजनक

भर्जितानितुबीजानिसंत्यकार्यकराणिच॥विद्वदिच्छातथेष्याऽसत्त्वबोधान्नकार्यकृत्॥
६३॥दग्धबीजमरोहेऽपिभक्षणायोपयुज्यते॥विद्वदिच्छाप्यल्पभोगंकुर्यान्नव्यसनंबहुम्॥६४॥

णफलसद्भावादितिसदृष्टांतमाह॥दग्धबीजमिति॥दग्धंभर्जितमित्यावत्॥व्यसनंविपदादिरू
पंबहुविधं॥व्यसनंविपदिभ्रंशेदोषेकामजकोपजेत्यभिधानात्॥६४॥ ब ॥ ॥

तृ.दी.
५०

ननुकर्मविभोगद्वाराव्यसनमपिजनयेदित्याशंक्याह॥ भोगेनेति॥ प्रारब्धकर्मणोभोगमात्रहेतुत्वात्तथ
त्वनजनकत्वमित्यर्थः। कुतस्तर्हिव्यसनजन्मेत्यतआह॥ भोक्तव्येति॥ तत्रतस्मिन्विषये॥६५॥ व्यसनहे
तुभ्रमंदर्शयति॥ माविनश्यत्विति॥ अयंभोगोमाविनश्यतु। त्वेषउत्तरोत्तरंवर्द्धतांविघ्नाश्चैनंमाप्रतिबध्नंतु

भोगेनचरितार्थत्वात्प्रारब्धंकर्महीयते॥ भोक्तव्यसत्यताभ्रांत्याव्यसनंतत्रजायते॥६५॥ मावि
नश्यत्वयंभोगोवर्द्धतामुत्तरोत्तरं॥ माविघ्नाःप्रतिबध्नंतुधन्योस्म्यस्मादितिभ्रमः॥६६॥

सप्रतिबंधंमाकुर्वंतु अस्मादेवभोगादहंधन्यःकृतार्थोस्मीत्येवंरूपोभ्रमोभवतिततएवव्यसनमित्यर्थः
व्यसंगादस्यपरिहारोपायमाह॥ यदभावीति॥ यद्भवितुमयोग्यंतन्नभवेदेवभवितुंयोग्यंचेत्तदन्यथानभ ६६
वेदेवेत्येवंरूपःचिंताविषघ्नःइदंमेश्रेयःकदाभविष्यतीदमनिष्टंकदानिवर्तिष्यतइत्येवमादिचिंतैव ५०

विषमिवस्वसंसृष्टपुरुषस्यनाशहेतुत्वाद्विषमिदंचिंताविषंहंतीतिचिंताविषघ्नः एवंभूतोयोबोधः
सोयंभ्रमनिवर्तकः पूर्वोक्तभ्रमस्यनिवर्तकइत्यर्थः॥६७॥ ननुविद्वदविदुषोरुभयोरपिभोगित्वाविशे

यदभाविनतद्भाविभाविचेन्नतदन्यथा॥ इतिचिंताविषघ्नोयंबोधोभ्रमनिवर्तकः॥६७॥ समेपि
भोगेव्यसनंभ्रांतोगच्छेन्नबुद्धवान्॥ अशक्यार्थस्यसंकल्पाद्भ्रांतस्यव्यसनंबहु॥६८॥ ॥माया
मयत्वंभोगस्यबुद्ध्वास्थामुपसंहरन्॥ भुंजानोपिनसंकल्पंकुरुतेव्यसनंकुतः॥६९॥ ॥

षेएकस्यव्यसनमन्यस्यतुतन्नेत्येतत्कुतइत्याशंक्यविपरीतज्ञानसत्त्वासत्त्वाभ्यांतत्सिद्धिरित्याह॥ समेपी
ति॥ बुद्धवान्ज्ञानवान्ज्ञानीत्यर्थः। भ्रांतःकथंव्यसनहेतुत्वमित्यतआह॥ अशक्येति॥६८॥ विवेकिनस्त
दभावंदर्शयति॥ मायामयत्वमिति॥६९॥ ननुमायामयत्वबोधेसत्यपिभोग्यस्यतदानींतन्मसुखहेतुता

तृ.दी. ५२ कुतश्चास्योपसंहार इत्याशंक्य बहुविधदोषदर्शनादित्याह । स्वप्नेंद्रजालेति ॥ १७० ॥ ननूक्तस्वप्नेंद्रजालसादृ-
श्यादिज्ञाने सत्यासक्तिभावो न भवेत्तदेव कुतो जायत इत्याशंक्य तज्ज्ञानोपायमाह ॥ स्वस्वप्नमिति । स्वकीयं स्व-
प्नमपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन्स्वप्नजागरावुभावप्यप्रमत्तः सन्मुहुश्चिंतयेत् स्वप्न-

स्वप्नेंद्रजालसदृशमचिंत्यरचनात्मकं ॥ दृष्टनष्टं जगत्पश्यन्कथं तत्रानुरज्यति ॥ १७० ॥ स्वस्वप्नमप-
रोक्षेण दृष्ट्वा पश्यन्स्वजागरं ॥ चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ॥ १७१ ॥ चिरं तयोः सर्व-
साम्यमनुसंधाय जागरे ॥ सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत् ॥ १७२ ॥ ७ ॥

तुल्योयं जागर इति

॥ १७१ ॥ एवं तयोः सर्वसाम्यं तात्कालिकभोगहेतुत्वपरिणतिविरसत्वविनाशित्वादिलक्षणं चिरमनुसंधाय
जागरेपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्वस्तुष्वपि पूर्ववज्जगत्सत्यत्वज्ञानदशायामिव नानुरज्यति अनुरक्तो ५२
न भवतीत्यर्थः ॥ १७२ ॥

ननु प्रपंचगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्त्वोपजीविनो भोगस्य परस्परविरोधान्मिथ्यात्वज्ञाने सति क-
थं भोगसिद्धिरित्याशंक्य भोगस्य विषयसत्त्वापेक्षाभावान्न विरोध इति परिहरति । इंद्रजालमिति ॥ इदं द्वैतं
भोग्यजातमचिंत्यरचनत्वादिंद्रजालवन्मिथ्येति पुनरनुसंधायाविस्मरतो विदुषः प्रारब्धकर्मफलयोः

इंद्रजालमिदं द्वैतमचिंत्यरचनत्वतः ॥ इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः ॥ १७३ ॥
निर्बंधस्तत्त्वविद्यायामिंद्रजालत्वसंस्मृतौ ॥ प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ॥ १७४ ॥

सुखदुःखयोरनुभवेन मिथ्यात्वानुसंधानस्य का हानिः वाशब्दान्मिथ्यात्वानुसंधानेन वा भोगस्य का हानिः वि-
भिन्नविषयत्वादिति भावः ॥ १७३ ॥ विभिन्नविषयत्वमेव दर्शयति । निर्बंध इति । तत्त्वविद्यायाः जगन्मिथ्यात्वगोचर-
स्य ज्ञानस्य इंद्रजालवज्जगतो मिथ्यात्वानुसंधाने निर्बंधो न तु भोगापलापे । प्रारब्धकर्मणस्तु जीवस्य सु-

खदुःखयोःप्रदानेआग्रहोनतुभोग्यसत्यत्वापादनइतिभावः॥१७४॥एवंविभिन्नविषयत्वंप्रदर्श्यप्रयोगमा
ह॥विद्येति॥विद्याप्रारब्धकर्मणीपरस्परंनविरुध्येतेविभिन्नविषयत्वात्संप्रतिपन्नरूपरसज्ञानवदि
त्यर्थः॥भोग्यमिथ्यात्वज्ञानंभोगबाधकंनभवतीत्येतन्नदृष्टमित्याशंक्याह॥जानद्भिरिति॥ऐंद्रजालजोविनोद

विद्यारब्धेविरुध्येतेनभिन्नविषयत्वतः॥जानद्भिरप्यैंद्रजालजोविनोदोदृश्यतेखलु॥१७५॥जगत्स
त्यत्वमापाद्यप्रारब्धंभोजयेद्यदि॥तदाविरोधिविद्यायाभोगमात्रान्नसत्यता॥१७६॥

इंद्रजालजसंबंधीचमत्कारविशेषःजानद्भिरपींद्रजालजत्वंजानद्भिरप्यवलोक्यतइतिप्रसिद्धमित्यर्थः॥१७५॥
किंचविद्याप्रारब्धकर्मणोर्विरोधोस्तीतिवदन्वक्तव्यःकिंप्रारब्धकर्मविद्याविरोधीत्युच्यतेउतविद्याप्रार
ब्धकर्मविरोधिनीति॥नाद्यइत्याह॥जगत्सत्यत्वमितिप्रारब्धंकर्मजगतोभोग्यजातस्यसत्यत्वमबाध्यत्व ४२

मापाद्यसंपाद्ययदिभोजयेज्जीवस्यसुखदुःखेदद्यात्तदाविद्याविषयस्यमिथ्यात्वस्यापहाराद्विद्याया विरो
धिस्यान्नचैतथाकरोतिकिंतुभोगमेवप्रयच्छति॥अतोनविद्याविरोधिप्रारब्धमितिभावः॥भोगबलादेव
भोग्यस्यसत्यत्वमपिस्यादित्याशंक्याह॥भोगमात्रादितिविवादविषयीभूतंविमतंसत्यंभोग्यत्वादित्यत्रदृ

अनृतेनाजायतेभोगःकल्पितैःस्वप्नवस्तुभिः॥जाग्रद्वस्तुभिरप्येवमसत्यैर्भोगइष्यताम्॥१७७॥यदि
विद्याऽपह्नुवीतजगत्प्रारब्धघातिनी॥तदास्यान्नतुमायात्वबोधेनतदपह्नवः॥१७८॥ ७॥

ष्टांताभावइतिभावः॥१७६॥ननुमिथ्यापदार्थैर्भोगोभवतीत्यत्रापिदृष्टांतोनास्तीत्याशंक्याह॥अनृतेनइति
॥१७७॥द्वितीयमाह॥यदीति॥विद्यायदिजगद्भोग्यजातमपह्नुवीतनेदंरजतमितिनिषेधकज्ञानव
त्प्रतीयमानस्यभोग्यस्यस्वरूपंविलोपयेत्तदाप्रारब्धकर्मभोग्यस्यसुखदुःखानुभवस्यसाधना

तृ.दी.
४३

प्रहारेण प्रारब्धकर्मविघातिनी स्यान्न च तथा करोति किंतु मिथ्यात्वमेव बोधयति। अतो न प्रारब्धकर्मविरोधिनीति
भावः। ननु मिथ्यात्वबोधनाद्द्वैतस्वरूपमपि विलोपयेदित्याशंक्याह। नेति। इंद्रजालादौ स्वरूपविलोपनमं
तरेणापि मिथ्यात्वज्ञानदर्शनादिति भावः॥७८॥ एतदेव प्रपंचयति। अनपह्नुत्येति। लोका जनास्तदिंद्रजा

अनपह्नुत्य लोकास्तदिंद्रजालमिदं विदुः। जानंत्येवानपह्नुत्य भोगं मायात्वधीस्तथा॥७९॥

लस्वरूपमनपह्नुत्याऽनिरस्येदमिंद्रजालमिति जानंतीत्यर्थः। यथा तथा भोगं भोग्यमनपह्नुत्याऽविलाप्य मायात्
वधीः जगन्मिथ्यात्वज्ञानं भवतीत्यर्थः॥७९॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिर्द्वैतद
र्शनस्याभावं बोधयत्यतो विद्योत्पद्यमाना जगद्विलापयेदेव। एवं सति विदुषो भोगः कथं स्यादिति श्रुत ४३

वष्टंभेन शंकते श्लोकद्वयेन। यत्र त्वस्येति। यत्र यस्यां विद्यावस्थायां कृत्स्नं जगदस्य विदुषः स्वात्मैवात्मैवा
भूदिदं सर्वं यदयमात्मेति ज्ञानेन स्वरूपमेव भवति तत्र तस्यां दशायां कोऽद्रष्टा केन साधनेन चक्षुषा किं द्र
ष्टव्यं रूपजातं पश्येदेवं घ्राणजस्पर्शनेन किं कुसुमादिकं जिघ्रेत्किं वा कं केन वागिंद्रियेण वदेदेवमितरेंद्रिय

यत्र त्वस्य जगत्स्वात्मा पश्येत्कस्तत्र केन किं। किं जिघ्रेत्किं वदेद्वेति श्रुतौ तु बहुघोषितं॥८०॥
तेन द्वैतमपह्नुत्य विद्योदेति न चान्यथा। तथा च विदुषो भोगः कथं स्यादिति चेच्छृणु॥८१॥ ब॥

व्यापाराभावद्योतनाय वाशब्दः इत्येवं प्रकारेण श्रुतौ बहुवारमभिहितमित्यर्थः॥८०॥ ततः किमित्यत आ
ह। तेनेति। स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीत्यस्मिन्सूत्रे यत्र त्वस्येत्युदाहृतायाः श्रुतेः सुषुप्तिमोक्ष
योरन्यतरविषयत्वेन व्याख्यातत्वान्न विद्याया जगदपह्नव इति परिहरति। तेनेति॥८१॥ ब॥ ॥ ॥

त॰दी॰
४४

स्वाप्ययः सुषुप्तिः संपत्तिर्मुक्तिरित्यर्थः ॥८२॥ अस्याः श्रुतेः सुप्त्यादिविषयत्वानंगीकारे बाधकमाह । अस्ये
ति । तत्रोपपत्तिमाह । द्वैतदृष्टाविति । याज्ञवल्क्यादिर्यदि द्वैतं पश्येत्तर्हि तदाऽद्वैतज्ञानाभावान्नाचार्यो भवे
द्यद्वैतं न पश्यति तर्हि बोध्यशिष्याद्यनुपलंभादाचार्यवाक्शिष्यं प्रतिबोधनाय न प्रवर्त्तेतातो विद्यासं

सुषुप्तिविषया मुक्तिविषया वा श्रुतिस्त्विति ॥ उक्तं स्वाप्ययसंपत्त्योरिति सूत्रे ह्यतिस्फुटं ॥८२॥ अ
न्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत् ॥ द्वैतदृष्टावविद्वत्ता द्वैतादृष्टौ न वाग्वदेत् ॥८३॥ निर्विक
ल्पसमाधौ तु द्वैतादर्शनहेतुतः ॥ सैवापरोक्षविद्येति चेत्सुषुप्तिस्तथा न किं ॥८४॥

प्रदायोच्छेदप्रसंग इति भावः ॥८३॥ ननु याज्ञवल्क्यादीनामाचार्यत्वदशायां विद्यमानस्य ज्ञानस्य विद्यात्वम
स्त्येव तथापि तस्यापरोक्षविद्यात्वं द्वैतप्रतीतिसद्भावान्निर्विकल्पसमाधौ तु द्वैतदर्शनाभावात्सैवापरो ४४

क्षविद्येति शंकते । निर्विकल्पेति । द्वैताप्रतीतेरतिप्रसंगापादकत्वान्नैवमिति परिहरति ॥ सुषुप्तिरिति ॥८४॥ अ
तिप्रसंगपरिहारं शंकते ॥ आत्मतत्त्वमिति । सुप्तौ द्वैतदर्शनाभावेऽप्यात्मगोचरज्ञानाभावान्न विद्यात्वं तस्या
इत्यर्थः ॥ तर्हि आत्मविवेकेन ज्ञानस्यैव विद्यात्वेन द्वैतदर्शनाभावस्येत्यह ॥ तदा त्वयेति ॥८५॥ ननु द्वैतादर्श

आत्मतत्त्वं न जानाति सुप्तौ यदि तदा त्वया ॥ आत्मधीरेव विद्येति वाच्यं न द्वैतविस्मृतिः ॥८५॥ उ
भयं मिलितं विद्या यदि तर्हि घटादयः ॥ अर्द्धविद्याभाजिनः स्युः सकलद्वैतविस्मृतेः ॥८६॥

नात्मज्ञानयोरुभयोर्मिलितयोरेव विद्यात्वं नैकैकस्येति शंकते ॥ उभयमिति । द्वैतविस्मृतेरपि विद्यां
शत्वांगीकारे जडस्याप्यर्द्धविद्यावत्त्वप्रसंग इति परिहरति ॥ नहीति । अत्रोपपत्तिमाह । सकलेति ॥८६॥

अस्मिन्नेवपक्षेसमाधिमतांपुरुषाणामद्वैविद्यावत्वमपिनस्यादितिसोपहासमाह॥मशकेति॥घटा
दीनांयथाद्वैतविस्मरणंदृष्टं।तथातत्वसमाधौद्वैतविस्मरणंनसंभवतिमशकध्वन्यादीनामनेकेषांवि
क्षेपाणांसद्भावादित्यर्थः॥८३॥नचात्मज्ञानस्यैवविद्यात्वंनद्वैतविस्मृतेरितिशंकते॥आत्मधीरि

मशकध्वनिमुख्यानांविक्षेपाणांबहुत्वतः॥नचविद्यातथानस्यात्घटादीनांयथाहृता॥८३॥
आत्मधीरेवविद्येतियदितर्हिसुखीभव॥दुष्टचित्तंनिरुंध्याश्चेन्निरुंधित्वंयथासुखं॥८४॥ व॥

ति॥तदस्माकमिष्टमित्यभिप्रायेणाशीर्वादयति॥तर्हीति॥नन्वात्मधीरेवविद्यास्तानदुष्टचित्तेसंभवत्य
तश्चित्तदोषपरिहारायचित्तवृत्तिनिरोधःकार्यइतिशंकामनुभाषते।दुष्टचित्तमिति।तदंगीकरोति।निरुं
धीति।अस्माकमपिविशेषः॥८४॥कुतइत्यतआह।एष्टव्येतिचित्तदोषापगमेसत्यद्वितीयात्मज्ञानायैष्य ४५

माणंजगन्मायामयत्वंसम्यगीक्ष्यतेयतोऽतइष्टमित्यर्थः॥एवंकिमिछन्नितिमंत्रांशेनाऽभिप्रेतमर्थमुपपा
दितमुपसंहरति॥इछन्निति।इछन्नप्ययंनेछतःकिमिछन्नितिस्मृतमितियोजना॥८५॥एवमभिप्रायवर्ण
नेकारणमाह।रागोलिंगमिति।रागोलिंगमबोधस्यचित्तव्यापारभूमिषु।कुतःशाड्वलतातस्ययस्याग्निःकोट

नदिष्टमेष्टव्यमायामयत्वस्यसमीक्षणात्॥इछन्नप्यज्ञवन्नेछेत्किमिछन्नितिहिश्रुतं॥८५॥रागो
लिंगमबोधस्यसंतुरागादयोबुधे॥इतिशास्त्रद्वयंसार्थमेवंसत्यविरोधतः॥८६॥ व॥ ॥

रेतरोरितितत्वविदोरागनिषेधपरंशास्त्रं।शास्त्रार्थस्यसमाप्तत्वान्मुक्तिःस्यात्तावतामितेःरागादयः
संतुकामंनतद्भावोऽपराध्यतइतितस्यैवरागोऽङ्गीकारपरंचशास्त्रं।एवंसतितत्वविदोहृद्रागाभावेसति
शास्त्रद्वयंसार्थमर्थवद्भवतिअविरोधतःरागनिषेधपरस्यशास्त्रस्यहृद्रागविषयत्वात्तदभ्युपगमप

रस्य रागाभासविषयत्वादिति भावः ॥ ९० ॥ एवं किमिच्छन्निति अंशस्याभिप्रायमुक्त्वा कस्य कामायेत्यंशस्या
भिप्रायमाह ॥ जगदिति ॥ यथा जगन्मिथ्यात्वबोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तमे
वमात्मनोऽसंगत्वबोधेन वास्तवभोक्त्रभावविवक्षया कस्य कामायेति श्रुत्याभिहितमित्यर्थः ॥ ९१ ॥ नन्वात्म

जगन्मिथ्यात्ववत्स्वात्माऽसंगत्वस्य समीक्षणात् ॥ कस्य कामायेति वचो भोक्त्रभावविवक्षया ॥ ९२ ॥
पतिजायादिकं सर्वं तद्भोगायैव नेच्छति ॥ किं त्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ॥ ९२ ॥ छ ॥ ॥

नो भोक्तृत्वप्रतिषेधस्तत्प्रसक्तिपूर्वको वक्तव्यः । सा तु न विद्यतेऽसंगत्वादात्मन इत्याशंक्य तत्प्रसक्तिमनुभवसि
द्धत्वान्मैवमित्यभिप्रेत्य तदनुवादिकां श्रुतिमर्थतोऽनुक्रामति ॥ पतिजायादिकमिति ॥ न वा अरे पत्युः कामाय
पतिः प्रियो भवत्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यनेन वाक्यसंदर्भेण पतिजायादिकस्य प्रपंचस्या ४६

त्मनो भोगसाधनत्वं प्रतिपाद्यते तत आत्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ॥ ९२ ॥ एवमात्मनो भोक्तृत्वं प्रदर्श्य तदप
वादाय भोक्तारं विकल्पयति ॥ किं कूटस्थस्य इति ॥ किं कूटस्थस्य भोक्तृत्वमुत चिदाभासस्य किं वोभयात्मकस्ये
ति विकल्पार्थः ॥ तत्र प्रथमं प्रत्याह ॥ तत्र न कूटस्थस्य इति ॥ ९३ ॥ असंगत्वमस्तु भोक्तृत्वमप्यस्तु को दोष इत्याशंक्या

किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः ॥ भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्ततां व्रजेत् ॥ ९३ ॥
सुखदुःखाभिमानाख्यो विकारो भोग उच्यते ॥ कूटस्थश्च विकारी चेत्येतन्न व्याहतं कथं ॥ ९४ ॥ छ ॥

ह ॥ सुखदुःखेति सुखित्वदुःखित्वाभिमानलक्षणो विकारो भोगः सोऽसंगकूटस्थस्य न युज्यते ॥ कूटस्थत्व
विकारित्वयोरेकत्र समावेशायोगादित्यर्थः ॥ ९४ ॥ ननु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वमस्त्वित्या
शंक्य विकारित्वेऽपि निरधिष्ठानस्य तस्यैवासिद्धेर्मैवमिति परिहरति ॥ विकारीति ॥ चिदाभासस्य विकारिबुद्ध्य

उ॰टी॰ ४१ पाध्यधीनत्वात्तस्मिन्विकारे संभवत्यपि तस्यारोपितस्यारोपितस्वरूपत्वेनाधिष्ठानभूतं कूटस्थं
विहाय स्वातंत्र्येणावस्थानासंभवात्केवलचिदाभासस्यापि भोक्तृत्वं न संभवतीति भावः॥८५॥ न
स्मात्तृतीयः पक्षः परिशिष्यते इत्याह॥ उभयात्मक इति। यत एकैकस्य भोक्तृत्वं न संभवत्यत उभ

विकारिबुद्ध्यधीनत्वादाभासे विहतावपि॥ निरधिष्ठानविभ्रांतिः केवलान्न हि तिष्ठति॥८५॥
उभयात्मक एवातो लोके भोक्ता निगद्यते॥ तादृगात्मानमारभ्य कूटस्थः शेषितः श्रुतौ॥८६॥ व

यात्मकः साधिष्ठानश्चिदाभास एव लोके व्यवहारदशायां भोक्तेत्यभिधीयते परमार्थतस्तूभयात्मकत्वमे।
व न घटत इति भावः॥ नन्वसंगो ह्ययं पुरुष इत्याद्यसंगत्वस्येव योऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिसा
क्षित्वस्यापि श्रवणादुभयात्मकं भोक्तृस्वरूपमपि पारमार्थिकमेव स्यान्न लोकव्यवहारमात्रसिद्धमित्या ४१

शंक्याश्रुतेस्तत्र तात्पर्याभावान्मैवमित्याह॥ तादृगात्मानमिति॥ तादृगात्मानं बुद्ध्युपाधिकं भोक्तारमात्मान
मारभ्यानद्य कूटस्थः बुद्ध्यादिकस्याधिष्ठानभूतश्चिदात्मा शेषितः॥ बुद्ध्याद्यनात्मनिरसनेन परिशेषितः
श्रुतौ बृहदारण्यकादावित्यर्थः॥८६॥ तत्र बृहदारण्यकवाक्यार्थं तावत्संक्षिप्य दर्शयति आत्मेति जन

आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन्॥ विज्ञानमयमारभ्यासंगं तं पर्यशेषयत्॥८७॥

केन कतम आत्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयन्योऽयं विज्ञानमयः प्राणेष्वित्यादिना वि
ज्ञानमयमुपक्रम्यासंगो ह्ययं पुरुष इत्यसंगं कूटस्थं परिशेषितवानित्यर्थः॥८७॥ ब॥ ॥ ॥

त.दी.
५८

एवं बृहदारण्यकेऽसंगात्मपरिशेषणप्रकारं प्रदर्श्यैतरेयादिश्रुत्यंतरेष्वपि तं दर्शयति॥ कोयमिति॥ कोयमा
त्मेति वयमुपास्महे कतरः आत्मेत्येवमादावात्मविचारेणांतःकरणोपाधिकमात्मानमारभ्य प्रज्ञानमात्रा
त्मकः कूटस्थः परिशेषितः एवमन्यत्राऽपि द्रष्टव्यं॥ एवं श्रुतिष्विति पर्यालोचनायामुभयात्मकस्य भोक्तुर्मि

कोयमात्मेत्येवमादौ सर्वत्रात्मविचारतः॥ उभयात्मकमारभ्य कूटस्थः शेष्यते श्रुतौ॥१९८॥ ७॥
कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माऽविवेकतः॥ तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति॥ १९९

थ्यात्वे पारमार्थिकस्यासंगस्य कूटस्थस्य भोक्तृत्वं सिद्धं॥१९८॥ ननूक्तरीत्या भोक्तुर्मिथ्यात्वे प्राणिनां
तस्मिन्सत्यत्वबुद्धिः कुतो जायत इत्याशंक्याह॥ कूटस्थेति॥ आत्मा लोकप्रसिद्धो भोक्ता आत्माविवेकतः स्वस्य कूट
स्याविवेकतानाभावेन कूटस्थनिष्ठं सत्यत्वमात्मन्यध्यस्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भो ५८

गं कदाचिदपि न हातुमिच्छति॥१९९॥ ननु तर्ह्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यात्मशेषत्वं भोग्यस्य कथं प्र
तिपाद्यत इत्याशंक्य न कूटस्थस्यात्मशेषत्वं प्रतिपाद्यते किंतु लोकप्रसिद्धोभयात्मकभोक्तृशेषत्वमेव श्रुत्याऽन्य
द्यत इत्याह॥ भोक्तेति॥ लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादि भोगोपकरणमिच्छतीत्ययं लौकिकवृत्तां

भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति॥ एष लौकिकवृत्तांतः श्रुत्या सम्यगनूदितः॥२००॥ भोग्या
नां भोक्तृशेषत्वान्मा भोग्येष्वनुरज्यतां॥ भोक्तर्येव प्रधानेऽतोऽनुरागं तं विधित्सति॥२०१॥

तः श्रुत्या सम्यगनू
दितो नाऽर्थांतरं प्रतिपद्यत इत्यर्थः॥२००॥ अनुवादः किमर्थमित्याशंक्य भोक्तर्येव प्रेम्णो विधानायेत्याह॥ भो
ग्यानामिति॥ भोग्यानां पतिजायादीनां भोक्तुः स्वस्य भोगोपकरणत्वाद्भोग्येष्वनुरागो न कर्तव्यः किंतु प्रधानभू
ते भोक्तर्येवानुरागः कर्तव्य इति विधानायेत्यर्थः॥२०१॥ ७ ॥ ॥

त.दी.
४८

भोग्येषुप्रेमत्यागपुरःसरमात्मप्रेमकर्तव्यतायांदृष्टांतत्वेनेश्वरेप्रेमप्रार्थनापुरःसरंपुराणवचनमुदाहरति।याप्री
तिरिति।।अविवेकानामात्मज्ञानशून्यानांविषयेष्वनपायिनीदृढायाप्रीतिरस्तिहेमापलक्ष्मीपतेसाप्रीतिस्त्वा
मनुस्मरतस्त्वांसदाचिंतयतोमेहृदयान्मनसःसर्प्पतुअपगच्छतुममनोविषयेष्वासक्तिंपरित्यज्यत्वय्ये

याप्रीतिरविवेकानांविषयेष्वनपायिनी।।त्वामनुस्मरतःसामेहृदयान्मापसर्पतु।।२०२।। ठ ।।

भोग्येषुप्रेमत्यागपुरःसरमात्मप्रेमकर्तव्यतायांदृष्टांतत्वेनेश्वरेप्रेमप्रार्थनापुरःसरंपुराणवचनमुदाह
रति।।याप्री वसदातिष्ठत्वित्यर्थः।।यदाविवेकानांविषयेषुदृढायादृशीप्रीतिरस्तिसातादृशीविषयेषुविद्य
मानाप्रीतिस्त्वामनुस्मरतोमेहृदयान्मापसर्पतुमापगच्छतुसदातिष्ठत्वित्यर्थः।।२०२।। ठ ।। ।। ४८

भवत्येवंपुराणोक्तौकिमायातमित्यतआह।।इतिन्यायेनेति।इत्यनेनपुराणोक्तन्यायेनसर्वस्माद्भोग्यजाता
त्पतिजायादिलक्षणाद्विरक्तधीःविरक्ताधीर्यस्यासौविरक्तधीःपुरुषस्तांभोग्यगोचरांप्रीतिंभोक्तर्यात्मन्यु
पसंहृत्यएवमात्मानंबुभुत्सतेबोद्धुमिच्छति।।२०३।।एवमात्मन्येवप्रेमोपसंहारेफलितंसदृष्टांतमाह।।

इतिन्यायेनसर्वस्माद्भोग्यजाताद्विरक्तधीः।।उपसंहृत्यतांप्रीतिंभोक्तर्येवंबुभुत्सते।।३।।स्र
क्चंदनवधूवस्त्रसुवर्णादिषुपामरः।।अप्रमत्तोयथातद्वन्नप्रमाद्यतिभोक्तरि।।४।। ठ ।।

स्रक्चंदनेति।पामरःपृथग्जनःस्रगादिविषयेषुयथाऽप्रमत्तःसावधानोभवतिएवंमुमुक्षुरप्यात्मनिविषयेऽनप्र
माद्यन्नवधानंनकरोतिकिंतुतच्चिंतयैवतिष्ठतीत्यर्थः।।४।।अनवधानाभावमेवबहुभिर्दृष्टांतैःस्पष्ट
यति।काव्येति।यथाविजिगीषुःप्रतिवादिजयकामइहलोकप्रधानःपुरुषोनिरंतरंकाव्यादीनभ्यस्यति

एवंमुमुक्षुरपिसदास्वात्मानंविचारयेत्॥२०५॥ यथावैदिकःस्वर्गाद्यर्थीतत्साधनानिजपादीनिश्रद्धालुरःस
रमनुतिष्ठतितथामुमुक्षुर्मोक्षेच्छयास्वेश्रौतआत्मनिविश्वासंकुर्यात्॥२०६॥ योगीयोगाभ्यासवान्

काव्यनाटकतर्कादिमभ्यस्यतिनिरंतरं॥ विजिगीषुर्यथातद्वन्मुमुक्षुःस्वंविचारयेत्॥५॥ जपया
गोपासनादिकुरुतेश्रद्धयायथा॥ स्वर्गादिवांछयातद्वच्छ्रद्दध्यात्स्वेमुमुक्षया॥६॥ चित्तैकाग्र्यंयथा
योगीमहायासेनसाधयेत्॥ अणिमादिप्रेप्सयैवंविविंच्यात्स्वंमुमुक्षया॥७॥ कौशलानिविवर्द्धंते
तेषामभ्यासपाटवात्॥ यथातद्वद्विवेकोस्याप्यभ्यासाद्विशदायते॥८॥

णिमाद्यैश्वर्यलोभेच्छयामहाया
सेनचित्तैकाग्र्यंयथासंपादयेत्तद्वदयमप्यात्मानंसदाविविंच्याद्देहादिभ्योविविच्यजानीयादित्यर्थः॥२०७॥
नन्वेवमेतेषांसदाभ्यासेनकिंफलमित्यतआह। कौशलानीति। यथातेषांकाव्याद्यभ्यासवतामभ्यासपाट

वेनतस्मिंस्तस्मिन्विषयेकौशलानिविवर्द्धंतेएवमस्यापिमुमुक्षोरभ्यासाद्विवेकोदेहादिभ्यआत्मनोभेद
ज्ञानंविशदायतेस्पष्टंभवति॥८॥ विवेकवैशद्यस्यफलमाह। विविंचतेति। अन्वयव्यतिरेकाभ्यांभोक्तृ
तत्त्वंभोक्तुःपारमार्थिकस्यस्वरूपंविविंचताभोग्येभ्योजडजातेभ्योभेदेनजानतापुरुषेणजाग्रदादि

विविंचताभोक्तृतत्त्वंजाग्रदादिष्वसंगता॥ अन्वयव्यतिरेकाभ्यांसाक्षिण्यध्यवसीयते॥९॥
यत्रयद्दृश्यतेद्रष्टाजाग्रत्स्वप्नसुषुप्तिषु॥ तत्रैवतन्नेतरत्रेत्यनुभूतिर्हिसंमता॥१०॥ ७॥

षुजाग्रत्स्वप्नसुषुप्तिष्ववस्थासुसाक्षिण्यसंगताऽध्यवसीयतेनिश्चीयतइत्यर्थः॥९॥ अन्वयव्यतिरे
कौदर्शयति। यत्रयदिति। जाग्रदादिषुमध्येयत्रयस्मिंस्थानेजाग्रतिस्वप्नेसुषुप्तौवायत्स्थूलंसूक्ष्म
मानंदश्चेति। त्रिविधंभोग्यंद्रष्टासाक्षिणादृश्यतेऽनुभूयतेतद्दृश्यंतत्रैवतस्मिन्नेवावस्थायांतिष्ठति

इतरत्र नरइतरस्यामवस्थायां नास्ति इष्टतु सर्वत्रानुगततया वर्त्तते इत्यनुभवसर्वसंमतः हि प्रसिद्धमेतदित्य
र्थः॥२०॥ न केवलमनुभवः किंत्वागमोपीत्यभिप्रायेणा स यत्त्व किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं
पुरुषः॥स वा एतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवतीत्यादिवा

स यत्र चेक्षते किंचित्तेनानन्वागतो भवेत्॥ दृष्ट्वैव पुण्यपापं चेत्येवं श्रुतिषु डिंडिमः॥२१॥

स्वयमर्थतः पठति॥स यत्रचेति॥स आत्मा तत्र तस्यामवस्थायां यत्किंचिद्भोग्यमीक्षते पश्यति तेन दृश्येना
नन्वागतो भवेद्दृश्यस्पृष्टो न भवेत्किंतु स्वयमेवावस्थांतरं गच्छतीत्यर्थः।पुण्यं पुण्यफलं सुखं पापं तत्फलं
दुःखं च दृष्ट्वैवानादायेत्यर्थः॥२१॥ व

मोक्षत्वविवेचनपराणि वाक्यांतराणि दर्शयति॥जाग्रदिति॥ यत्सत्यज्ञानानंदलक्षणं ब्रह्म स्वाभिन्नरूपेणाव
स्थितं तज्जाग्रदादिप्रपंचे प्रकाशते प्रकाशयति तद्ब्रह्माहमस्मीति बुद्धिवृत्तिदृढाभ्यासाद्ब्रह्मास्मीति ज्ञात्वा
श्रुत्यनुभवाभ्यां निश्चित्य सर्वप्रतिबंधैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते॥

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥२२॥
एक एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु॥ स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते॥२३॥ ॥

॥२२॥ जाग्रदादिष्ववस्थास्वेक एवात्मा मंतव्यः एवं विवेकज्ञानेन स्थानत्रयव्यतीतस्यावस्थात्रया
दिविलक्षणस्यात्मनः पुनर्जन्म न विद्यते एतच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः॥२३॥ ॥ ॥

त्रिषुधामसुत्रिविधेषुस्थानेषुयद्भोग्यंस्थूलप्रविविक्तानंदरूपंयश्चभोक्ताविश्वतैजसप्राज्ञरूपोयश्चभोगस्त
द्रुभवरूपश्चेतियेत्रिविधंतेतेभ्यःस्थानादिभ्योविलक्षणोयश्चिन्मात्ररूपःसाक्षीसदाशिवःनिरतिशयानं

त्रिषुधामसुयद्भोग्यंभोक्ताभोगश्चयद्भवेत्॥तेभ्योविलक्षणःसाक्षीचिन्मात्रोऽहंसदाशिवः॥
२४॥एवंविवेचितेतत्त्वेविज्ञानमयशब्दितः॥चिदाभासोविकारीयोभोक्तृत्वंतस्यशिष्यते॥२५॥

दरूपत्वेनसर्वदाशोभमानःपरमात्मास्तिसोऽहमस्मीत्यर्थः॥२४॥एवंविवेकेनात्मतत्त्वेऽसंगेनिश्चिते
सतिभोक्तृत्वंकस्येत्यतआह॥एवंविवेचितइति।योविज्ञानमयशब्देनाभिधीयमानश्चिदाभासस्तस्य
विकारित्वाद्भोक्तृत्वंइत्यर्थः॥२५॥ व॥

ननुचिदाभासस्यभोक्तृत्वांगीकारेकस्यकामायेतिवाचोभोक्तृभावविवक्षयेतिपूर्वोक्तंव्याहन्येतेत्याशं
क्यतस्यवचनस्यपारमार्थिकभोक्तृभावपरत्वमभिप्रेत्यभोक्तुश्चिदाभासस्यमिथ्यात्वंसाधयति।मा
यिकोयमिति।अयंचिदाभासोमायिकोमृषात्मकःश्रुतेर्जीवेशावाभासेनकरोतीतिश्रुतेःअनुभवा

मायिकोयंचिदाभासःश्रुतेरनुभवादपि॥इंद्रजालंजगत्प्रोक्तंतदंतःपात्ययंयतः॥२६॥

दपिद्रष्टादित्रितयमध्यवर्त्तित्वेनानुभूयमानत्वादपीत्यर्थः॥तदेवोपपादयति।इंद्रजालमिति।इंद्रजाल
वन्मिथ्याभूतेजगत्यंतर्भूतत्वादस्यापिमिथ्यात्वंतद्वदनुभूयतेविद्वद्भिरितिशेषः।यस्माज्जगदंतःपाती
स्ततोमृषेतियोजना॥२६॥

अस्य जगत इव विनाशित्वानुभवादपि मृषात्वमित्याह ॥ विलयोपीति ॥ मूर्छादिरादिशब्दार्थः ॥ भवतु मृ-
षात्वं ततः किमित्यत आह ॥ एतादृशमिति ॥ यदा कूटस्थादिविवेचितश्चिदाभासो मायिको ज्ञातस्तदा स्व-

विलयोप्यस्य सुप्त्यादौ साक्षिणा ह्यनुभूयते ॥ एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः ॥१७॥
विविच्य नाशं निश्चित्य पुनर्भोगं न वाञ्छति ॥ मुमूर्षुः शायितो भूमौ विवाहं कोभिवाञ्छति ॥१८॥
जिह्रेति व्यवहर्तुं च भोक्ताहमिति पूर्ववत् ॥ छिन्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते ॥१९॥

स्वभावं स्वतत्त्वमेतादृशं मृषात्मकं पुनः पुनर्विविनक्ति कूटस्थाद्विविच्य जानाति ॥१७॥ ततोपि किमित्यत
आह ॥ विविच्येति ॥ स्वविनाशनिश्चये भोगेच्छाभावे दृष्टान्तमाह ॥ मुमूर्षुरिति ॥१८॥ किंच पूर्ववदहं भोक्ते-
ति व्यवहर्तुमपि लज्जत इत्याह ॥ जिह्रेतीति ॥ नहि ज्ञानोत्पत्त्यनंतरं प्रारब्धावसानपर्यंतं कथं व्यवहर- ५३

तीत्यत आह ॥ छिन्ननास इति ॥ ह्रीतो लज्जितः क्लिश्यन्नेदानीमपि कर्म क्षीयतामिति क्लेशमनुभवन्नारब्धक-
र्मफलं भुंक्त इत्यर्थः ॥१९॥ इदानीं ज्ञानानंतरं साक्षिणो भोक्तृत्वाभावः कैमुतिकन्यायसिद्ध इत्याह ॥ यदा
स्वस्येति ॥ अयं चिदाभासः स्वस्यापि भोक्तृत्वं मंतुमहं भोक्तेति ज्ञातुं जिह्रेति विलज्जते यदा तदा एतत्स्व-

यदा स्वस्यापि भोक्तृत्वं मंतुं जिह्रेत्ययं तदा ॥ साक्षिण्यारोपयेदेनमिति कैव कथा वृथा ॥२०॥
इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशंकया ॥ कस्य कामायेति ततः शरीरानुज्वरो न हि ॥२१॥

गतं भोक्तृत्वं साक्षिण्यसंगे आरोपयेदितीदृग्या कथा ऽयुक्ता सा कैव न कापीत्यर्थः ॥२०॥ उक्तमर्थं स्फुटता-
रूढं करोति ॥ इत्यभिप्रेत्येति ॥ कस्य कामायेति श्रुतिरित्यर्थः ॥ कूटस्थस्य चिदाभासस्य वा पारमार्थिकभो-
क्तृत्वाभावमभिप्रेत्याविशंकया शंकाराहित्येन भोक्तारमाक्षिपति निराकरोति ॥ भवत्वेवं भोक्त्राक्षेपस्ततः कि-

मित्यत आह। तत इति। ज्वरो ज्वरणं संतापः॥२१॥ तत्त्वविदः शरीरानुज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्व
रसद्भावं च दर्शयति। स्थूलमिति॥२२॥ तत्र स्थूलशरीरे ज्वरांस्तावदाह। वातपित्तेति॥२३॥ सूक्ष्मशरीरज्व

स्थूलं सूक्ष्मं कारणं च शरीरं त्रिविधं स्मृतं॥ अवश्यं त्रिविधोस्त्येव तत्र तत्रोचितो ज्वरः॥२२॥ वा
तपित्तश्लेष्मजन्या व्याधयः कोटिशस्तनौ॥ दुर्गंधित्वकुरूपत्वदाहभंगादयस्तथा॥२३॥ का
मक्रोधादयः शांतिदांत्याद्या लिंगदेहगाः॥ ज्वरा द्वयेपि बाधंते प्राप्याप्राप्य नरं क्रमात्॥२४॥

रान्दर्शयति। कामेति। कामादीनां शांत्यादीनां च ज्वरत्वमुपपादयति। द्वयेपीति द्विविधा अपि क्रमेण प्राप्य
प्राप्तिभ्यां नरं बाधंते। ततो ज्वरसाम्याज्ज्वरा इत्युच्यंत इत्यर्थः॥२४॥ कारणशरीरगतो ज्वरं छांदोग्यश्रुता
वक्तु इत्याह। स्वं परं वेति। नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि वि

नाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति वाक्येन स्वपरज्ञानशून्यत्वमज्ञानेन सुषुप्तायत्वं परेष्वागा
मिदुःखबीजवासनासद्भावं चेंद्रेण शिष्येण गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः॥२५॥ एवं त्रिष्व
पि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह। एत इति। त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः

स्वं परं च न वेत्त्यात्मा विनष्ट इव कारणे॥ आगामिदुःखबीजं चेत्येतदिंद्रेण दर्शितं॥२५॥
एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः॥ वियोगे तु ज्वरैस्तानि शरीराण्येव नासते॥२६॥

सहोत्पन्नत्वेन स्वाभाविकाः संमताः। स्वाभाविकत्वं व्यतिरेकमुखेनोपपादयति वियोगे त्विति॥ यतः कार
णदेहाभिमानैस्तैः शरीराणां वियोगे तानि शरीराणि नासत एव नैव संभवेयुस्ततः स्वाभाविका इत्यर्थः
॥२६॥

कू॰दी॰
५५

तत्र दृष्टांतमाह। ततोर्वागिति॥२७॥इदानीं कूटस्थस्य ज्वराभावं कैमुतिकन्यायेन दिदर्शयिषुश्चिदाभासे तावज्ज्व
राभावं दर्शयति। चिदाभास इति। चिदाभासे स्वतः शरीरत्रयगतज्वरसंबंधमंतरेण न कोपि ज्वरो विद्यते
कुत इत्यत आह। यत इति। चितः प्रकाशैकस्वभावस्य विदनुभवसिद्धत्वात्॥तत्प्रतिबिंबस्यापि चिदाभास

ततोर्वाग्विभुरप्येतत्पटो वा लेप्यःकंबलो यथा॥मदीयदेहस्तथा देहो ज्वरेभ्योपीति दर्शयतो॥२७॥चिदा
भासे स्वतः कोपि ज्वरो नास्ति यतश्चितः॥ प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत्॥२८॥चिदाभा
सेप्यसंभाव्या ज्वराः साक्षिणि का कथा॥एवमप्येकतां मेने चिदाभासो ह्यविद्यया॥२९॥

स्तथात्वमेवास्य
मितिभावः॥२८॥यदर्थं चिदाभासे ज्वराभावः प्रतिपादितस्तदिदानीं दर्शयति। चिदाभासेपीति। यदा चिदा
भासेपि ज्वरा न संभाव्यंते तदा साक्षिणि संभवंतीति किमु वक्तव्यमितिभावः॥ ननु तर्हि ज्वरामीत्यनुभ ५५

वस्य का गतिरित्यत आह। एवमपीति॥२९॥एकतां मेने इति संक्षेपेणोक्तमर्थं प्रपंचयति साक्षीति चिदाभासः
स्वेन सहिते शरीरत्रये साक्षिगतं सत्यत्वमध्यस्य तत्सर्वं ज्वरवच्छरीरत्रये स्वस्य वास्तवं रूपमिति मन्यत इ
त्यर्थः॥३०॥एवं भ्रांतिज्ञाने सति किं भवतीत्यत आह। एतस्मिन्निति। अयं चिदाभासोऽस्यां भ्रांतिवेला

साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्रये॥ तत्सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते॥३०॥एत
स्मिन्भ्रांतिकालेऽयं शरीरेषु ज्वरत्स्वपि॥स्वयमेव ज्वरामीति मन्यते हि कुटुंबिवत्॥३१॥ ७ ॥

यां शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयन्नित्यर्थः॥ तत्र दृष्टांतमाह। कुटुंबीवदिति॥३१॥दृष्टांतं विशदयति
पुत्रेति॥३२॥एवमविवेकदशायां चिदाभासे भ्रांत्या ज्वरं प्रदर्श्य विवेकदशायां तदभावं दर्शयति। विवि
च्येति। चिदाभासः कूटस्थस्वात्मानं शरीराणि च विविच्य भेदेन ज्ञात्वा इदं सर्वं मम वास्तवं स्वरूपमिति

त.दी.
५६

मन्यत इत्युक्तो भ्रांतिं परित्यज्य स्वस्याभासरूपत्वज्ञानेन स्वस्मिन्नध्यारोपमकुर्वन्स्वस्य निजरूपं ज्वरा
दिरहितं साक्षिणं सदा चिंतयेच्छरीरमनु ज्वरवच्छरीरमनु स्वस्य स्वयं कस्मात्संज्वरेन्न संज्वरेदेवेत्यर्थः॥

पुत्रदारेषु तप्यत्सु तपामीति यथा वृथा॥ मन्यते न करस्तद्वदाभासोऽप्यभिमन्यते॥३२॥ विवि
च्य भ्रांतिमुज्झित्वा स्वमप्यगणयन्सदा॥ चिंतयन्साक्षिणं कस्माच्छरीरमनु संज्वरेत्॥३३॥ अय
थावस्तुसर्पादिज्ञानं हेतुः पलायने॥ रज्जुज्ञानेऽहिधीर्ध्वस्तौ कृतमप्यनुशोचति॥३४॥ ॥

॥३३॥ भ्रांतिज्ञानतत्त्वज्ञानयोर्ज्वरतदभावकारणत्वं दृष्टांतप्रदर्शनेन स्पष्टयति। अयथेति। रज्ज्वा
दौ कल्पितस्य सर्पादेर्ज्ञानं पलायने कारणं भवति। आदिशब्देन स्थाणौ कल्पितश्चोरो गृह्यते। रज्ज्वादि
ज्ञानेन सर्पादिबुद्धिनिवृत्तौ तदपि पलायनमनुशोचति वृथा कृतं मयेत्यनुतप्यत इत्यर्थः॥३४॥ ७॥ ५६

साक्षिणं सदा चिंतयन्नित्युक्ते दृष्टांतेन स्पष्टयति। मिथ्येति। यथा लोके मिथ्याभियोगकर्ता तद्दोषस्य प्राय
श्चित्तसिद्ध्यर्थं मिथ्याभियुक्तं पुनः पुनः क्षमापयति। एवमयं चिदाभासोऽपि साक्षिण्यसंगात्मनि भोक्तृत्वा
द्यारोपलक्षणमिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षिणमात्मानं क्षमापयन्निव शरणं गतः तत्रैव

मिथ्याभियोगदोषस्य प्रायश्चित्तत्वसिद्धये॥ क्षमापयन्निवात्मानं साक्षिणं शरणं गतः॥३५॥
आवृत्तपापनुत्त्यर्थं स्नानाद्यावर्त्यते यथा॥ आवर्तयन्निव ध्यानं सदा साक्षिपरायणः॥३६॥

दृष्टांतांतरमाह। आवृत्तेति। यथा पापकारिणा पुरुषेण कृतपापनुत्त्यर्थमभ्यस्तपापापनोदाय विहितं
स्नानादिकं प्रायश्चित्तमावर्त्यते पुनः पुनरनुष्ठीयते। तथायमपि चिरं साक्षिणि संसारित्वारोपणदोषप
रिहाराय ध्यानं परिवर्तयन्निव सदा साक्षिपरायणो भवति॥३६॥ एवं साक्षिपरत्वं दृष्टांतैरुपवर्ण्य स्तु

तृ.दी. ५१

णप्रख्यापनेनज्ञानुत्वं सदृष्टान्तमाह ॥ उपस्थेति ॥ ३७ ॥ इदानीं शरीरत्रयादिवेष्टितस्य चिदाभासस्य
पुनस्तैः सह तादात्म्यभ्रमाभावे दृष्टान्तमाह ॥ गृहीत इति ॥ ३८ ॥ न केवलं स्वापराधनिवृत्त्यै साक्ष्यनुसर

उपसृष्टकुट्टिनी वेश्या विलासेषु विलज्जते ॥ जानतोऽप्येतथाभासः स्वप्रख्यानौ विलज्जते ॥ ३७ ॥
गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः ॥ म्लेच्छैः संकीर्यते नैव तथाभासः शरीरकैः ॥ ३८ ॥
यौवराज्ये स्थितो राजपुत्रः साम्राज्यवांछया ॥ राजानुकारी भवति तथाभास्यनुकार्यपि ॥ ३९ ॥

णं किंतु महत्प्रयोजनसिद्ध्यर्थमपीति सिंहावलोकनन्यायेन सदृष्टान्तमाह ॥ यौवराज्य इति ॥ राजानुकारी भव
तिराजेव प्रजारंजनादियुक्तवान्भवतीत्यर्थः ॥ ३९ ॥ ननु युवराजस्य राजानुसरणे साम्राज्यं फलं दृश्यते नै ५१
वं साक्ष्यनुसरणे तत्तदनुसरणे कथं प्रवर्त्तत इत्याशंक्याह ॥ यो ब्रह्मेति ॥ स यो ह वै तत्परमं ब्रह्म वेद ब्र

तरति ब्रह्मांकं

ह्मैव भवति ॥ नास्य ब्रह्मवित्कुले भवति ॥ तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवतीति श्रुतौ ब्रह्मभा
वादिरूपस्य फलस्य श्रूयमाणत्वात्तत्फलवांछया साक्ष्यनुसरणे प्रवर्त्तनं युक्तमित्यर्थः ॥ ४० ॥ ननु ब्रह्म
ज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव विनश्येदतः स्वनाशाय कथं प्रवर्त्ततेऽत्याशंक्याह ॥ देवत्व

यो ब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिं ॥ श्रुत्वा तदेकचित्तः सन्ब्रह्म वेत्ति न चेतरत् ॥ ४० ॥
देवत्वकामा ह्यग्न्यादौ प्रविशंति यथा तथा ॥ यावदारब्धदेहं स्यान्नाभासत्वविमोचनं ॥ ४१ ॥

कामा इति ॥ यथा लोके देवत्वप्राप्तिकामा मनुष्या अग्न्यवधिप्रयागगंगाप्रवेशादौ प्रवर्त्तंते ॥ एवं साक्षिरूपेऽ
णावस्थानलक्षणस्याधिकफलस्य विद्यमानत्वाच्चिदाभासत्वापगमहेतौ ब्रह्मज्ञानेऽपि प्रवृत्तिर्युक्ता
इत्यर्थः ॥ ४१ ॥

स्यादित्येतावता शोषाय स्वविनाशं वांछति ॥ ४१ ॥

ननुतत्त्वज्ञानेनाभासत्वमपगच्छतिचेत्कथंतत्त्वविदांजीवत्त्वव्यवहारइत्याशंक्यप्रारब्धकर्मक्षयपर्यंतं
तदुपपत्तिंसदृष्टांतमाह॥यावदिति॥यथाऽग्नौप्रविष्टःपुरुषोदाहादिनास्वदेहनाशपर्यंतंनरत्वंनर
त्वव्यवहारयोग्यत्वंनैवमुंचतिएवंप्रारब्धकर्मक्षयपर्यंतंचिदाभासत्वव्यवहारोननिवर्त्ततइत्यर्थः

यावत्स्वदेहदाहंसनरत्वंनैवमुंचति॥तावदारब्धदेहेस्मान्नाभासत्वविमोचनं॥४२॥
रज्जुज्ञानेपिकंपादिशनैरेवोपशाम्यति॥पुनर्मंदांधकारेसारज्जुःक्षिप्तोरगीभवेत्॥४३॥

॥४२॥ननुभोक्तृत्वादिभ्रमोपादानस्याज्ञानस्यनिवृत्तत्वात्पुनःकथंभोगानुवृत्तिःकथंवामर्त्योहमिति
विपरीतप्रतीतिरित्याशंक्यदृष्टांतप्रदर्शनेनैतत्संभावयति॥रज्जुज्ञानेपीति॥४३॥दार्ष्टांतिकेयो
जयति॥एवमिति॥४४॥ननुपुनर्मर्त्यबुद्ध्युदयेतेनतत्त्वज्ञानंबाध्येतेत्याशंक्याह॥नैतावतेति॥कदाचिदिदं ५८

मर्त्योहमित्येवंविज्ञानोदयमात्रेणागमप्रमाणजनिततत्त्वज्ञानंनबाध्यते॥कुतइत्यतआह॥जीवन्मुक्तीतिइदं
मर्त्यत्वबुद्ध्यकरणलक्षणंजीवन्मुक्तिव्रतंनियमेनानुष्ठेयंनभवतिकिंतुसम्यग्ज्ञानेनभ्रांतिज्ञाननि
वृत्तिरित्ययंवस्तुस्वभावः॥अतःकदाचिन्मर्त्यत्वबुद्ध्युदयेपिपुनस्तत्त्वज्ञानांतरेणतस्याएवबाधत्व

एवमारब्धभोगेपिशनैःशाम्यतिनोद्भवात्॥भोगकालेकदाचित्तुमर्त्योहमितिभासते॥४४॥
नैतावतापराधेनतत्त्वज्ञानंविनश्यति॥जीवन्मुक्तिव्रतंनेदंकिंतुवस्तुस्थितिःखलु॥४५
दशमोपिशिरस्ताडंरुदन्बुद्ध्वानरोदिति॥शिरोव्रणस्तुमासेनशनैःशाम्यतिनोतदा॥४६

मितिभावः॥४५॥भवतुरज्जुसर्पादिस्थलेविपरीतज्ञाननिवृत्तावपितत्कार्यकंपाद्यनुवृत्तिःप्रकृतदृष्टांते
दशमेदशमस्त्वमसीतिवाक्यविचारजन्यज्ञानेनभ्रमनिवृत्तौतत्कार्यानुवृत्तिर्नोपलभ्यतइत्याशंक्याह

दशमोपीति॥ दशमोस्मीतिज्ञानोदये सति शिरस्ताडनपूर्वकं रोदनमात्रं निवर्त्तते ताडनजन्यव्रणस्त्वनु
वर्त्तत एवेत्यर्थः॥४६॥ ननु ज्ञानोत्तरकालेपि संसारानुवृत्तौ मुक्तेः कुतः पुरुषार्थतेत्याशंक्य मुक्तिलाभ
जन्यहर्षस्य तद्दुःखाच्छादकत्वात्पुरुषार्थतेति दृष्टांतपूर्वकमाह॥ दशमेति॥४७॥ जीवन्मुक्तिव्रतेने

दशमामृतिलाभेन जातो हर्षो व्रणव्यथां॥ तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखितां॥
४७॥ व्रताभावाद्यदाध्यासस्तदाभ्यासो विविच्यतां॥ रससेवी दिने भुंक्ते भूयो भूयो यथा
तथा॥४८॥

इति मुक्तेन च व्रतताभावे किमायातमित्यत आह॥ व्रताभावादिति पुनः पुनः विचा
रकरणे दृष्टांतमाह॥ रससेवीति॥ यथा रससेवी नरः एकस्मिन्दिने क्षुद्बाधापरिहाराय पुनः पु
नर्भुंक्ते तदध्यासनिवृत्तये पुनः पुनर्विवेकः क्रियतामित्यर्थः॥४८॥ व॥ ॥ ५९

ज्ञानेनानिवर्त्यस्य प्रारब्धकर्मफलस्य केन तर्हि निवृत्तिरित्याशंक्य ताडनजन्यव्रणस्यौषधेन भोगे
नैव निवृत्तिरित्याह॥ शमयतीति॥४९॥ अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभये इमे। अवस्थे जीव
गे श्रुत आत्मानं चेदितिश्रुतिरित्यनेन श्लोकेन आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमि

शमयत्यौषधेनायं दशमः स्वं व्रणं यथा॥ भोगेन शमयित्वैतत्प्रारब्धं मुच्यते तथा॥४९॥
किमिच्छन्निति वाक्योक्तशोकमोक्ष उदीरितः॥ आभासस्य ह्यवस्थैषा षष्ठी तृप्तिस्तु सप्तमी
५०॥

च्छन्कस्य कामाय शरीरमनुसंज्वरेदित्यस्मिन्मंत्रे ऽपरोक्षज्ञानशोकनिवृत्त्याख्ये जीवावस्थे द्वे अ
भिहिते इत्युक्तमिदानीं तदभिधानप्रकारं चितो जीवस्य सप्तमीं तृप्तिलक्षणामवस्थां दर्शयितुं कीर्तनपूर्वकं
वक्तुमारभते॥ किमिच्छन्नितीति॥ किमिच्छन्नित्युत्तरार्द्धेनाभिहितो यः शोकमोक्षः स एतावता ग्रंथेन संद

त॰ दी॰
६०

नैर्मल्यो हीरितो ऽभिहितः॥ एषा अज्ञानमावृतिस्तद्विक्षेपश्चापरोक्षधीः॥ अपरोक्षमितिः। शोकमो
क्षस्तृप्तिर्निरंकुशेत्यनेन श्लोकेनाभिहितासु सप्तसु जीवावस्थासु षष्ठी स्यात्॥ आभासस्येति। सप्त

सोऽकुशा विषयैस्तृप्तिरियं तृप्तिर्निरंकुशा॥ कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तृप्यति॥
॥५२॥

मीत्याख्यायत इति शेषः॥ ५१॥ अपरोक्षज्ञानजन्मायास्तृप्तेर्निरंकुशत्वं प्रतियोगिदर्शनपुरः
सरं प्रतिजानीते। सोंकुशेति। विषयजायजन्मायास्तृप्तेर्विषयान्तरकामनया कुंठितत्वा
त्सांकुशत्वमस्यास्तु तदभावान्निरंकुशत्वं। तदेव दर्शयति कृतमिति॥ ५२॥ ७॥ ॥ ६०

कृतकृत्यत्वमेवोपपादयति। ऐहिकेति। अस्य विदुषस्तत्त्वज्ञानोदयात्पूर्वमिह लोके दृष्टप्राप्तये ऽनिष्टनि
वृत्तये च कृषिवाणिज्यादिकं स्वर्गादिसिद्धये यागोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं

ऐहिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये॥ बहुकृत्यं पुरास्याऽभूत्तत्सर्वमधुना कृतं॥५२॥
तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरं॥ अनुसंदधदेवायमेवं तृप्यति नित्यशः॥५३॥ ७

चेति। बहुविधं कर्तव्यमासीदिदानीं तु सांसारिकफलेच्छाभावाद्ज्ञानेन साक्षात्कारस्य सिद्धत्वाच्च तत्स
र्वं कृषियागश्रवणादिकं कृतं कृतप्रायमभूदतः परमनुष्ठेयाभावादित्यर्थः॥ ५२॥ एवं कृतकृत्यत्व
मुपपाद्य तत्कृतजन्यां तृप्तिं दर्शयति। तदेतदिति॥

तृ.टी.
६२

प्रतियोगिपुरःसरं प्रतियोग्यनुसंधानपूर्वकं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण सर्वदा तत्प्र
ति। तदेवानुसंधानं प्रपंचयति। दुःखिनोऽज्ञा इत्यादिनाष्टमश्लोकात्तथात्वतः श्लोकप्राप्तया
पुनरित्थं तेन प्राक्तनेन ग्रंथेन। तत्र तावद्दैहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति। दुःखिन इति॥

दुःखितोऽज्ञाः संसरंतु कामं पुत्राद्यपेक्षया॥ परमानंदपूर्णोऽहं संसरामि किमिच्छया॥५४॥
अनुतिष्ठंतु कर्माणि परलोकयियासवः॥ सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथं॥
५५॥ व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा॥ येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः
५६

॥५४॥ स्वर्गाद्यर्थं कर्माद्यनुष्ठातृभ्यो वैलक्षण्यमाह॥ अनुतिष्ठंत्विति॥५५॥ ननु स्वार्थप्रवृत्त्यभावेऽपि प
रार्थप्रवृत्तिः किं न स्यादित्याशंक्याधिकाराभावात्सापि नास्तीत्याह॥ व्याचक्षतामिति॥५६॥ छ॥ ६२

ननु स्वदेहनिर्वाहार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यतेऽतोऽक्रियत
मसिद्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किंत्वन्यैरेव कल्पितमित्याह। निद्राभिक्षे इति॥५७॥ अन्यकल्पन
यापि विरोधोऽस्तीत्याशंक्य तदभावे दृष्टांतमाह। गुंजापुंजादीति॥५८॥ ननु फलांतरेच्छाभावे कर्माननुष्ठानं मा

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च॥ द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात्॥५७॥
गुंजापुंजादि दह्येत नान्यारोपितवह्निना॥ नान्यारोपितसंसारधर्मानेवमहं भजे॥५८॥

भवत्वसाक्षात्कारायश्रवणादिकं कर्तव्यमेवेत्याशंक्याज्ञानाद्यभावाच्छ्रवणादिकर्तृत्वमपि नास्ती
त्याह। शृण्वंत्विति। अज्ञाततत्त्वा अज्ञातं ब्रह्मात्मैकत्वलक्षणं तत्त्वं यैस्ते तथाभूताः श्रवणं कुर्वंतु
तत्त्वमित्थमन्यथा वेति संशयवंतो मननं कुर्वंतु मम तु तदुभयाभावान्नोभयत्र प्रवृत्तिरित्यर्थः
५९

त॰दी॰ ६२ मान्ततोश्रवणमननेविपर्ययनिरासार्थंनिदिध्यासनंकर्त्तव्यमित्याशंक्यदेहाद्यात्मबुद्धिलक्षणस्य
विपर्ययस्याभावात्तदपिनानुष्ठेयमित्याह।विपर्ययस्तइति॥६०॥ननुविपर्ययाभावेऽहंमनुष्य॰

अएवंत्वजानंतस्तेजानन्कस्माच्छृणोम्यहं॥मन्यंतांसंशयापन्नानमन्येहमसंशयः॥५८॥
विपर्यस्तोनिदिध्यासेत्किंध्यानमविपर्यये॥देहात्मत्वविपर्यासंनकदाचिद्भजाम्यहं॥६०॥अ
हंमनुष्यइत्यादिव्यवहारोविनाप्यमुं॥विपर्यासंचिराभ्यस्तवासनातोऽवकल्पते॥६१॥प्रारब्ध
कर्मणिक्षीणेव्यवहारोनिवर्त्तते॥कर्माक्षयेत्वसौनैवशाम्येद्ध्यानसहस्रतः॥६२॥

इतिव्यवहारःकथंघटतइत्याशंक्यवासनावशाद्भवतीत्याह।अहंमनुष्यइति॥६१॥नन्वस्यव्यवहार
स्यनिवृत्तिसिद्धयेध्यानंसंपाद्यमित्याशंक्यप्रारब्धक्षयमंतरेणास्यनिवृत्तिर्नास्तीत्याह।प्रारब्धकर्म्मणी ६२
ति॥६२॥

ननुप्रारब्धनिमित्तकस्यापिव्यवहारस्यविरलत्वायध्यानंकर्त्तव्यमेवेत्याशंक्यव्यवहारस्याबाधकत्वद
र्शनात्तन्निवृत्तयेध्यानमननुष्ठेयमित्याह।विरलत्वमिति॥६३॥ध्यानस्याकर्त्तव्यत्वेपिविक्षेपपरिहा

विरलत्वंव्यवहृतेरिष्टंचेद्ध्यानमस्तुते॥अबाधिकांव्यवहृतिंपश्यन्ध्यायाम्यहंकुतः॥६३॥
विक्षेपोनास्तियस्मान्मेनसमाधिस्ततोमम॥विक्षेपोवासमाधिर्वामनसस्याद्विकारिणः॥
६४॥नित्यानुभवरूपस्यकोमेऽत्रानुभवःपृथक्॥कृतंकृत्यंप्रापणीयंप्राप्तमित्येवनिश्चयः
॥६५॥

रायसमाधिःकर्त्तव्यइत्याशंक्यविक्षेपसमाधानयोर्मनोधर्म्मत्वान्नविक्षेपनिवारकेपिसमाधौममा
धिकारइत्याह।विक्षेपइति।६४॥ननुसमाधिफलानुभवःसंपादनीयइत्याशंक्यतस्यमत्स्वरूपत्वान्न
संपाद्यइत्याह।नित्यानुभवेति॥

उपपादितं कूटस्थत्वं निगमयति। कूटस्थमिति। ६४॥ एवं सर्वत्र कर्तृत्वानभ्युपगमेऽनियतवृत्तित्वे प्र
सज्येतेत्याशंक्य प्रारब्धवशान्नाप्रसमनियतवृत्तित्वमंगीकरोति। व्यवहार इति। लौकिको भिक्षाहारादिः

व्यवहारो लौकिको वा शास्त्रीयो वाऽन्यथापि वा॥ ममाकर्तुरलेपस्य यथारब्धं प्रवर्त्ततां॥६५॥
अथवा कृतकृत्योऽपि लोकानुग्रहकाम्यया॥ शास्त्रीयेणैव मार्गेण वर्त्तेऽहं का मम क्षतिः॥६६॥

शास्त्रीयो जपसमाध्यादिरन्यथापि वा प्रतिषिद्धं हिंसादिर्वा व्यवहारः कर्तृत्वभोक्तृत्वरहितस्य मम प्रारब्धं
कर्मानतिक्रम्य प्रवर्त्ततामित्यर्थः॥६५॥ एवं वस्तुतत्त्वमभिधाय प्रौढवादेनाह॥ अथवेति। लोकानु
ग्रहकाम्यया प्राण्यनुग्रहेच्छयेत्यर्थः॥६६॥ उ

शास्त्रीयएवमार्गे प्रवर्त्तनांगीकारे तर्हि तदभिमानप्रयुक्तो विकारः स्यादेवेत्याशंक्याह। देवार्चनेत्यादि
ना श्लोकद्वयेन। तारं प्रणवं आम्नायमस्तकं वेदांतशास्त्रं। ६७। ६८॥ फलितमाह। एवं चेति। ६९। विभि

देवार्चनस्नानशौचभिक्षादौ वर्त्ततां वपुः॥ तारं जपतु वाक् तद्वत्पठत्वाम्नायमस्तकं॥६७॥ विष्णुं ध्या
यतु धीर्यद्वा ब्रह्मानंदे विलीयतां॥ साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये॥६८॥ एवं च क
लहः कुत्र संभवेत्कर्मिणो मम॥ विभिन्नविषयत्वेन पूर्वापरसमुद्रवत्॥६९॥ वपुर्वाग्धीषु नि
र्बंधः कर्मिणो न तु साक्षिणि॥ ज्ञानिनः साक्ष्यलेपत्वे निर्बंधो नेतरत्र हि॥७०॥ एवं चान्योन्यवृत्तां
तानभिज्ञौ बधिराविव॥ विवदेतां बुद्धिमंतो हसंत्येव विलोक्य तौ॥७१॥

न्नविषयत्वमेव स्पष्टय
ति। वपुरिति। ७०॥ अथापि यौ ज्ञानिकर्मिणौ कलहं कुर्वाते तौ विद्वद्भिः परिहसनीयावित्याह एवं चान्यो
न्येति ७१

त॰दी॰ ६५

कुतः परिहास्यत्वमित्याशंक्य निर्विषयकज्ञहकारित्वादित्याह। यं कर्मीति। कर्मी यं साक्षिणं कर्मानुष्ठानो
पयोगिदेहवाग्बुद्ध्यतिरिक्तं प्रत्यगात्मानं न विजानाति तत्त्ववित्तस्य ब्रह्मत्वं बुध्येत कर्मिणः कर्मानुष्ठा

यं कर्मी न विजानाति साक्षिणं तस्य तत्त्ववित्। ब्रह्मत्वं बुध्यतां न च कर्मिणः किं विहीयते॥७२॥
देहवाग्बुद्धयस्त्यक्ता ज्ञानिनाऽनृतबुद्धितः। कर्मी प्रवर्त्तयत्वाभिर्ज्ञानिनो हीयतेऽत्र किं॥७३॥
प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः क्वोपयुज्यते॥

नेकिं हीयते॥७२॥ ज्ञानिना मिथ्यात्वबुद्ध्या परित्यक्ता
भिर्देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानिनो वा किं हीयतेऽतो निर्विषयकज्ञहकारिणोः परिहसनीयत्वमित्य
र्थः॥७३॥ कर्मानुष्ठाने प्रयोजनाभावत्वान्न ज्ञानिनाऽप्युपगम्यत इति शंकते। प्रवृत्तिरिति। उपयोगाभावे ६५

निवृत्तावपि समान इति परिहरति। निवृत्तिरिति। निवृत्ते बोधहेतुत्वान्नोपयोगाभाव इति शंकते। बोधहे
तुरिति। तर्हि प्रवृत्तिरपि क्षुत्पाहेतुत्वादुपयोगवतीत्याह। क्षुन्नत्वायामिति॥७४॥ ननु बुद्धस्य क्षुन्नत्वाभा
वात्प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते। बुद्धश्चेदिति। तर्हि बुद्धस्य पुनर्बोधाभावान्न हेतुर्निवृत्तिरपि बु

बोधहेतुर्निवृत्तिश्चेत्क्षुन्नत्वायां न चेतरा॥७४॥ बुद्धश्चेन्न बुभुत्सेत नाप्यसौ बुध्यते पुनः॥ अ
बाधानुवृत्तेर्न बोधान्तरमसाधनात्॥७५॥ नाविद्या नापि तत्कार्यं बोधं बाधितुमर्हति। पु
रैव तत्त्वबोधेन बाधिते ते उभे यतः॥७६॥

इयमनुपयोगिनीत्याह। नाप्यसाविति। सकृज्ज्ञातस्य बोधस्य
स्थिरत्वाय निवृत्तिरपेक्ष्यत इत्याशंक्य स्थिरत्वं बाधकाभावमपेक्ष्य नेन साधनान्तरमित्याह। अबाधादिति।
वाक्यप्रमाणजन्यज्ञानस्य बलवता प्रमाणेन बाधाभावादनुवृत्तिः स्यादेवाऽतो न साधनान्तरेण तद्यमनुपेक्ष्य
मित्यर्थः॥७५

ननु प्रमाणांतरेण बाधाभावेप्यविद्यया तत्कार्येण कर्तृत्वाध्यासेन वा बाधः स्यादित्याशंक्याह॥ नाविद्येति
।नत्र हेतुमाह दृढ इरेवेति॥७६॥ नन्वविद्याया बाधितत्वेपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वासंभवात्तेन बो
धस्य बाधो भवेदित्याशंक्योपादाननिवृत्त्यैव तस्यापि बाधितत्वात्तेनापि बाधः शंकितुं शक्य इत्याह॥ बा

बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते॥ जीवन्नाखुर्न मार्जारं हंति हन्यात्कथं मृतः॥७७॥
अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः॥ निःफलेषुवितुन्नांगो नंस्यतीत्यत्र का प्रमा॥७८॥

धितमिति। तत्र दृष्टांतमाह। जीवन्निति। आखुर्मूषकः॥७७॥ द्वैतदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुति
कन्यायप्रदर्शनेन द्रढयितुं तदनुकूलं दृष्टांतमाह। अपीति। यः समर्थः पाशुपतास्त्रेण विद्धोऽपि न ममा
र चेत्किल स निःफलेषुवितुन्नांगः शल्यरहितेषुणा व्यथितदेहः सन् नंक्ष्यतीति नाशं प्राप्स्यतीत्यत्र का प्र ६५
माणमस्तीत्यर्थः॥७८

दृष्टांते सिद्धमर्थं दार्ष्टांतिके योजयति। आदाविति। आदौ विद्याभ्याससमये चित्रैर्बहुविधैः स्वकार्यैः प्र
मातृत्वभोक्तृत्वकर्तृत्वादिभिर्जृम्भमाणयाविर्वर्धमानयाऽविद्यया बोधो युद्ध्वा युद्धं कृत्वा तामजयत्। स एवा
भ्यासपाटवेन सुदृढोऽद्येदानीमविद्यानिवृत्तौ सत्यां निर्मूलेन तत्कार्येणाध्यासेन कथं बाध्यतां न कथमपि

आदावविद्यया चित्रैः स्वकार्यैर्जृम्भमाणया॥ युद्ध्वा बोधोऽजयत्सोऽद्य सुदृढो बाध्यतां कथं॥
७९॥ तिष्ठंत्वज्ञानतत्कार्यशवा बोधेन मारिताः॥ न भीतिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य तै
:॥८०॥ य एवमतिशूरेण बोधेन न वियुज्यते॥ प्रवृत्त्या वा निवृत्त्या वा देहादिगतया सुखी॥८१॥

बाध्येतेत्यर्थः॥७९॥ उपपादितमर्थं श्रोतृबुद्ध्यारोहाय रूपकेणाह। तिष्ठंत्विति॥८०॥ नन्वेवं प्रवृत्तौ किमा
यातमित्यत आह। य एवमिति। यः पुमानेवमुक्तप्रकारेणातिशूरेण विद्यातत्कार्यघातकेन बोधेन

त·दी·
६६

ब्रह्मात्मैकत्वज्ञानेनन विमुच्यते। न कदापि विमुक्तो भवति॥ अस्य पुंसो देहादिनिष्ठया प्रवृत्ता वा निवृत्ता
वा किं न किमपीहमनिष्टं वेत्यर्थः॥ नहि ज्ञानिवदज्ञानिनोपि निवृत्त्या वाग्रहो न मुक्तः स्यादाशंक्याह॥ प्रवृत्ता
विति। तत्रोपपत्तिमाह॥ स्वर्गायवेति॥ ८२॥ विदुषश्चाग्रहो न मुक्तः स्यात्तु कें न हि कर्मिणां मध्ये वर्त्तमा

प्रवृत्तावाग्रहो न्याय्यो बोधहीनस्य सर्वथा॥ स्वर्गाय वाऽपवर्गाय यतितव्यं यतो नृभिः॥ ८२
विद्वांश्चेत्तादृशां मध्ये तिष्ठेत्तदनुरोधतः॥ कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः॥ ८३॥

नेन तेन किं कर्त्तव्यमित्यत आह॥ विद्वांश्चेदिति॥ विद्वांस्तादृशां कर्मिणां मध्ये तिष्ठेच्चेत्तदनुरोधतस्तेषा
मनुसारेण शारीरादिभिः सर्वाः क्रियाः करोत्येव न तान्कर्मिणो निवारयेदित्यर्थः॥ ८३॥ व॥ ॥ ॥ ६६

अस्यैव तत्त्वबुभुत्सूनां मध्येऽवस्थितस्य कृत्यमाह॥ एष इति॥ एष विद्वान्बुभुत्सूनां मध्ये यदा तिष्ठेत्तदा तेषां बु
भुत्सूनां बोधाय तत्त्वज्ञानजननाय ताः क्रिया दूषयंस्त्वयमपि त्यजतु॥ ८४॥ कुत एवं कर्त्तव्यमित्यत आह॥
अविद्वदिति॥ अज्ञानामनुसारेण ज्ञानिनो वर्त्तनमुचितं तल्लघुत्वात्तेषामनुकम्पनीयत्वाच्चेति भावः॥ एवं क्ष

एष मध्ये बुभुत्सूनां यदा तिष्ठेत्तदा पुनः॥ बोधायैषां क्रियाः सर्वा दूषयंस्त्यजतु स्वयं॥ ८४॥ अ
विद्वदनुसारेण वृत्तिर्बुद्धस्य युज्यते॥ स्तनंधयानुसारेण वर्त्तते तत्पिता यतः॥ ८५॥ अधिक्षिप्त
स्ताडितो वा बालेन स्वपिता तदा॥ न क्लिश्नाति न कुप्येच्च बालं प्रत्युत लालयेत्॥ ८६॥ व॥

दृष्टमित्यत आह॥ स्तनंधयेति॥ स्तनंधयाः स्तनपानकर्त्तारः शिशव इत्यर्थः॥ ८५॥ पितुस्तनंधयाऽनु
सारित्वमेव दर्शयति॥ अधिक्षिप्त इति॥ ८६॥ दार्ष्टान्तिके योजयति॥

तृ.दी.
६७

निंदितइति। विद्वानज्ञैर्निंदितः स्तूयमानो वा स्वयं न निंदति न स्तौति किंतु तेषामज्ञानिनां यथा बोध उत्पद्य
ते तथाचरेत्॥८७॥ एवमाचरणे निमित्तमाह। येनायमिति। अयमज्ञानी अत्रास्मिंल्लोके विदुषो येन

निंदितः स्तूयमानो वा विद्वानज्ञैर्न निंदति। न स्तौति किंतु तेषां स्याद्यथा बोधस्तथाचरेत्॥८७॥
येनायं नटनेनात्र बुध्यते कार्यमेव तत्। अज्ञप्रबोधान्नैवान्यत्कार्यमस्त्यत्र तद्विदः॥८८॥

यादृशेन नटनेनाचरणेन बुध्यते तत्त्वमवगच्छति तदाचरणं तेन कर्तव्यमेव। ननु तर्हि तद्देव कार्यांत
रमपि प्रसज्येतेत्यत आह अज्ञप्रबोधादिति। एतत्तद्विदस्तत्त्वविदोऽत्र लोकेऽज्ञप्रबोधादन्यत्क
र्तव्यं नैवास्त्यतस्तदनुसरणेन तत्त्वबोधनं कर्तव्यमित्यर्थः॥८८॥ ब ॥ ६७

इत्यवशिष्यमाणयोस्तात्पर्यमाह। कृतकृत्यतयेति॥ असौ विद्वानुक्तप्रकारेण कृतकृत्यतया कृ
तं कृत्यजातं येनासौ कृतकृत्यस्तस्य भावस्तत्ता तया तृप्तः सन्पुनर्वक्ष्यमाणप्रकारेण प्राप्तप्राप्य
तया प्राप्तं प्राप्यं येन स प्राप्तप्राप्यस्तस्य भावस्तत्ता तया च तृप्यन्नक्षोभवन्स्वमनसा निरंतरमेवं

कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः। तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरंतरं॥८९॥
धन्योऽहं धन्योऽहं नित्यं स्वात्मानमंजसा वेद्मि॥

मन्यते॥८९॥ किमन्यत इत्यत आह। धन्योऽह
मित्यादिना॥ धन्यः कृतार्थः। अहरार्याविद्यानित्यमनवरतं स्वात्मानं स्वस्य निजं रूपं देशाद्यन
वच्छिन्नं प्रत्यगात्मानमंजसा साक्षाद्यतो वेद्मि जानाम्यतो धन्योऽस्मीत्यर्थः॥ ॥

द.टी.
९८

एवमात्मज्ञानलाभनिमित्तां तुष्टिमभिधाय तत्फललाभनिमित्तां तां दर्शयति॥ धन्योऽहमिति। ब्रह्मानं-
दः ब्रह्मभूतानंदः मे स्फुरन् हि विभाति स्फुरन् यथा भवति तथा स्फुरतीत्यर्थः॥९०॥ एवमिहचामुत्र तुष्टिमभि-

धन्योऽहं धन्योऽहं ब्रह्मानंदो विभाति मे स्पष्टं॥९०॥ धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽ-
द्य॥ धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि॥९१॥ ७॥

धायानिष्पन्निहत्यापि तुष्यतीत्याह॥ धन्योऽहमिति। अद्येदानीं दुःखं दुःखरूपं संसारं न वीक्षे न पश्या-
म्यतः कृतार्थ इत्यर्थः। दुःखाभावे तीतौ कारणमाह॥ धन्योऽहमिति॥ अनेकवासनाजाज्जमज्ञानं क्वापि प-
लायितं नष्टमित्यर्थः।९१। ९८

अज्ञाननिवृत्तिफलं कृतकृत्यत्वं प्राप्तप्राप्यत्वं च दर्शयति॥ धन्योऽहमिति। इदानीं कृतकृत्यत्वमित्यादिना ज्ञा-
तायास्तुष्टेर्निरतिशयत्वमाह॥ धन्योऽहमिति।९२। अतः परं वक्ष्याद्दर्शनात्तुष्टिरेव परिस्फुरतीति

धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किंचित्॥ धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमद्य संपन्नं॥९२॥
धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके॥ धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनर्धन्यः॥९३॥
अहो पुण्यमहो पुण्यं फलितं फलितं दृढं॥ अस्य पुण्यस्य संपत्तेरहो वयमहो वयं॥९४॥

दर्शयति। धन्योऽहमिति॥९३॥ अस्य सर्वस्य कारणभूतपुण्यपुंजपरिपाकमनुस्मरंस्तुष्यतीत्याह॥ अहो
पुण्यमिति॥ एवंविधपुण्यसंपादकमात्मानमनुस्मरंस्तुष्यति॥ अस्येति॥९४॥ ७॥ ॥ ॥

इदानीं सम्यग्ज्ञानसाधनं शास्त्रं तदुपदेष्टारमाचार्यं चानुस्मरन् तुष्यति। अहो शास्त्रमिति। पुनश्च शास्त्रजन्यं ज्ञानं तज्जन्यं सुखं चानुस्मरन् संतुष्यति। अहो ज्ञानमिति।।२९७।। ग्रंथाभ्यासफलमाह। तृप्ती

अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः।। अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखं।।२९७।।
तृप्तिदीपमिमं नित्यं येऽनुसंदधते बुधाः।। ब्रह्मानंदे निमज्जंतस्ते तृप्यंति निरंतरं।।२९८।।
।। इति तृप्तिदीपः समाप्तः।। ७ ।। ।।श्री।। ।।

ती।।२९८।। इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता तृप्तिदीपव्याख्या समाप्ता।। ।।छ।। छ।। ।। ।। ।।